एता द्वादश नद्यस्तु प्राधान्येन प्रकीर्तिताः ॥ १३ ॥

आभिस्तु पूजितं (अभिसंपूजितं ed.) यस्माद्भारतं बहु-
कर्मभूमिरतो देवैर्वर्षं तद्भिप्रकीर्तितं ॥ १४ ॥ [पुण्यदं ।

पार्वतानि च तीर्थानि दैवजानि (दे० ed.) क्वचित्क्वचित् ।
आसुरैरावृतान्यासंस्तदेवासुरमुच्यते ॥ १५ ॥

देवेष्वेव प्रदेशेषु तपस्तप्त्वा महर्षयः ।
दैवप्रसादात्तपसा (*r.* ०स) आर्षाणीति च तान्यपि ॥ १६ ॥

आत्मनः श्रेयसो गुप्त्यै यशसो वाप्तये ऽथवा[2] ।
आत्मनः फलभूत्यर्थं यशसो वाप्तये पुनः ॥ १७ ॥

मनुष्यैः कारितान्याहुर्मानुषाणीति नारद ।
एवं चतुर्विधा भेदास्तीर्थानां मुनिसत्तम ॥ १८ ॥

भेदं न केचिज्जानंति श्रोतारश्च चतुर्विधं[3] ।
बहवः पंडितंमन्याः शृण्वंति कथयंति च ॥ १९ ॥

सुकृतान्यपि जानंति (सुकृती को ऽपि जानाति ed.)
[चक्रुं श्रोतुं निजैर्गुणैः ॥

---

[1] *Ān.* ed. omits v. 11*b* and 12*a*.

[2] B omits this *ardharca*, thus ending *Brahman's* speech by a full *śloka*; ०मुक्त्यै पूजायै भूतये ऽथवा। *Ān.* ed.

[3] भेदं न कश्चिज्जानाति श्रोतुं युक्तो ऽसि नारद । ed.

नारद उवाच ॥

तेषां स्वरूपं भेदं च श्रोतुमिच्छामि तत्त्वतः ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मर्त्यधर्मवान्[1] ॥ २० ॥
ब्रह्मन् कृतयुगादावप्युपायो ऽन्यो न विद्यते ।
तीर्थसेवां विना स्वल्पसेवाभीष्टार्थदायिनीं[2] ॥ २१ ॥
न त्वया सदृशो धातर्वक्ता ज्ञाताथवा क्वचित् ।
त्वं नाभिकमलाद्विष्णोः संजातो ऽखिलपूर्वजः[3] ॥ २२ ॥

ब्रह्मोवाच ॥

गोदावरी भीमरथी तुंगभद्रा च वेणिका ।
तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः ॥ २३ ॥
भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च वितस्ता च हिमवत्पर्वताश्रिताः ॥ २४ ॥
एता नद्यः पुण्यतमा दैवतीर्थे ऽप्युदाहृताः[4] ।
गयः कोलासुरो वृत्रस्त्रिपुरो ह्यंधकस्तथा[5] ॥ २५ ॥
हयमूर्धा च लवणो नमुचिः शृंगकस्तथा (शंबरस्तथा B) ।
मयः पातालकेतुश्च मायः[6] पुष्कर एव च ॥ २६ ॥
प्रभासो भार्गवो ऽगस्तिर्नरनारायणौ[7] तथा ।
वसिष्ठश्च भरद्वाजो गौतमः कश्यपो मनुः[8] ॥ २७ ॥
इत्यादिऋषितीर्थानि ऋषिजुष्टानि नारद ॥ २८(!) ॥
ऋंबरीषो हरिश्चंद्रो नहुषो राम एव च[9] ।
कुरुः कनखलश्चैव भरतः[10] सगरस्तथा ॥ २९ ॥
अश्वयूपो नागकेतुर्वैन्यः कपिरिरिंदमः[11] ।
इत्यादिमानुषैर्ब्रह्मन् निर्मितानि शुभानि च ॥ ३० ॥
यत्नतः पालनार्थं[12] निर्मितानि मनीषिभिः ॥ ३१ ॥
स्वतो भूतानि(स्वतोद्भू° ed.) दैवानि यत्र क्वापि जगत्त्रये ।
पुण्यतीर्थानि तान्याहुस्तीर्थभेदो मयोदितः ॥ ३२ ॥
यत्खातं तु न केनापि देवखातं तदुच्यते ।
संक्षेपेणोदितो ऽयं ते तीर्थभेदो मया मुने ।
मुच्यते सर्वपापेभ्यो नरो यज्ज्ञानमात्रतः[13] ॥ ३३ ॥

1. *tīrthabhedavarṇanam*, fol. 1*b*; 2. *gaṅgotpattau śambhuvivāhasambhavaḥ*, fol. 2*b*; 3. *gaṅgotpattau kamaṇḍaludānam*, fol. 3*b*; 4. *gaṅgāmaheśvarajaṭāgamanam*, fol. 5*a*; 5. *vināyakagautamavyāpāra*, fol. 6*b*; 6. *gautamyavataraṇam*, fol. 8*a*; 7. *gautamīvarṇanam*, fol. 9*a*; 8. *bhāgīrathīgaṅgāvatāraṇam*, fol. 10*a*; 9. *vārāhatīrthavarṇanam*, fol. 10*b*; 10. *kapotatīrthavarṇanam*, fol. 12*b*; 11. *kaumāratīrthavarṇanam*, fol. 13*a*; 12. *kṛittikātīrthamāhātmyavarṇanam*, fol. 13*b*; 13. *koṭitīrthavarṇanam*,[14] fol. 14*a*; 14. *daśāśvamedhamāhātmyam*, fol. 14*b*; 14.* *paiśācatīrthavarṇanam*, fol. 15*a*; 15. *sudhātīrthavarṇanam*, fol. 15*b*; 16. *ahalyāsaṃgame indratīrthavarṇanam*, fol. 16*b*; 17. *janasthānavarṇanam*, fol. 17*a*; 18. *navatrīṇisahasrayutabhānutīrthavarṇanam* (*Aruṇāvaruṇāśvabhānutīrtha* °, B), fol. 18*a*; 19. *gāruḍakāśyapavarṇanam*, fol. 19*a*; 20. *govardhanatīrthav.*, ib.; 21. *dhautapāpapraṇāśanasanājjātagālavatīrthav.*, fol. 20*a*; 22. *viśvāmitrendraśyenaparjanyatīrthav.*, fol. 20*b*; 23. *uttaratīre tīrthavarṇanam* (*śvetatīrthav.*, B), fol. 21*b*; 24. *śukratīrtha - mṛitasaṃjīvanītīrthav.*, fol. 22*a*; 25. *puṇyāsiktāsaṃgatendratīrthādiv.*, fol. 22*b*; 26. *paulastyavaiśravasadhaneśvaravāksaṃgamavarṇanam*, fol. 23*b*; 27. *āgneyāditīrthav.*, fol. 24*a*; 28. *ṛiṇamocanam*, ib.; 29. *kadrūsuparṇāsaṃgamav.*, fol. 24*b*; 30. *sarasvatīsaṃgama-*

---

[1] °मुच्यते नात्र संशयः B, ed.

[2] स्वल्पायासेनाभीष्टदायिनीम् ed.

[3] त्वं नाभिकमले विष्णोः° ed.; B omits *ślokas* 21 and 22.

[4] देवती° ed.; °तीर्थान्युदाहृताः B, ed.

[5] कोह्लासुरो (*v.l.* कोह्लासुरो) ° ed.; गयः कोलासुरो-येणस्त्रिपुरं पुत्र पातितं । B.

[6] यमः(धियः B) पातालकेतुश्च मयः ed., B.

[7] अगस्त्यो नर° B. Before this line ed. inserts : एतैरावृततीर्थानि आसुराणि शुभानि च ।

[8] गोतमो° ed.; °काश्यपो B; °मुनिः ॥ A.

[9] मांधाता मनुरेव च ed.; मांडव्यो राम एव च B.

[10] क्रतुः कन° B; °भद्राश्वः (*v.l.* भरतः) ed.

[11] अश्वयूपो नाचिकेतो वृषाकपिररिंदमः । B.

[12] यशसः° ed.; यशसे B; °फलभूत्यर्थं B, ed.

[13] B and ed. omit these three lines.

[14] B omits this colophon, making ch. 14 and 14* of A to be 13 and 14.

purūravabrahmatīrthav., fol. 25*a*; 31. *sāvitryādipañcanadīsaṃgamamṛigavyādhabrahmav.*, ib.; 32. *śamyādidaśatīrthav.*, fol. 25*b*; 33. *viśvāmitrāditīrthav.*, fol. 27*b*; 34. *pūrṇādipañcaviṃśatinadīnadasaṃgamav.*, fol. 28*a*; 35. *śivaśaktinivāsādiv.*, fol. 29*a*; 36. *vṛiddhāsaṃgamāditīrthav.*, fol. 30*b*; 37. *ilābudhapurūravāvasishṭhanṛityagītasaubhāgyādisaṃgama - ileśvarāditīrthav.*, fol. 33*b*; 38. *cakratīrthav.*, fol. 35*a*; 39. *pippalāditīrthav.*, fol. 40*a*; 40. *nāgatīrthanāgeśvarav.*, fol. 42*a*; 41. *mātṛitīrthanavakapratishṭhānav.*, fol. 42*b*; 42. *brahmatīrthabrahmaśiroliṅgaśivatīrthav.*, fol. 43*b*; 43. *deva(tīrtha)sattrávighnatīrthav.*, fol. 44*a*; 44. *śeshanāma(śesheśvaraśūleśvarādi)*, fol. 44*b*; 45. *vaḍavādisahasratīrthav.*, fol. 45*a*; 46. *ātmatīrthav.*, fol. 45*b*; 47. *aśvatthatīrthav.*, fol. 46*b*; 48. *somatīrtha - amṛitasaṃgamav.*, fol. 47*a*; 49. *dhānyatīrthādiv.*, fol. 47*b*; 50. *vidarbhāsaṃgamarevatītīrthav.*, fol. 48*a*; 51. *pūrṇatīrthasaṃgamagovindasiddheśvarāditīrthav.*, fol. 50*b*; 52. *vāmatīrthav.*, fol. 54*b*; 53. *rāmādyashṭālakatīrthav.*, fol. 55*a*; 53.* *putrāditīrthav.*, fol. 57*b*; 54. *yamāgnitīrthādiv.*, fol. 59*a*; 55. *tapastīrthādiv.*, fol. 59*b*; 56. *pañcadaśasahasrāshṭaśatatīrthav.*, fol. 61*a*; 57. *tapovananandinīsaṃgamāditīrthav.*, fol. 62*b*; 58. *abjakatīrthav.*, fol. 65*a*; 59. *āpastambasomeśvarav.*, fol. 66*a*; 60. *bāṇatīrtha - śārṅgapāṇitīrthādiv.*, fol. 67*b*; 61. *yakshiṇīsaṃgamāditīrthav.*, fol. 68*a*; 62. *śuklatīrthādiv.*, fol. 68*b*; 63. *cakratīrthādiv.*, fol. 69*a*; 64. *vāṇīsaṃgamavāgīśvaretyāditīrthav.*, fol. 70*a*; 65. *maudgalyavishṇutīrthādiv.*, fol. 71*a*; 66. *lakshmītīrthādiv.*, fol. 74*a*; 67. *bhānvāditīrthav.*, fol. 75*a*; 68. *khaḍgatīrthādiv.*, fol. 75*b*; 69. *anvindrātreyādi-tīrthav.*, fol. 76*b*; 70. *kapilāsaṃgamādi-tīrthav.*, fol. 77*a*; 71. *devasthānāditīrthav.*, fol. 77*b*; 72. *siddhatīrthādiv.*, fol. 78*a*; 73. *parushṇīsaṃgamāditīrthav.*, fol. 78*b*; 74. *mārkaṇḍeyāditīrthav.*, fol. 79*a*; 75. *kālañjarāditīrthav.*, fol. 80*a*; 76. *apsarоyugasaṃgamav.*, fol. 80*b*; 77. *kāṇvāgniputrāgneyahiraṇyakoṭitīrthādiv.*, fol. 81*b*; 78. *nṛisiṃhāditīrthav.*, fol. 82*a*; 79. *piśācāditīrthav.*, fol. 82*b*; 79.* *nimnabhedadvīpāditīrthav.*, fol. 83*a*; 80. *ānandatīrthādiv.*, fol. 84*b*; 81. *bhāvatīrthādiv.*, fol. 85*a*; 82. *sahasrakuṇḍāditīrthav.*, fol. 85*b*; 83. *kapilāsaṃgamādiśatatīrthav.*, fol. 86*a*; 84. *śaṅkhatīrthādiv.*, fol. 86*b*; 85. *kishkindhātīrthav.*, fol. 87*b*; 86. *vyāsatīrthādiv.*, fol. 88*b*; 87. *vañjarāsaṃgamāditīrthav.*, fol. 89*b*; 88. *devāgamāditīrthav.*, fol. 90*a*; 89. *praṇītāsaṃgamakuśatarpaṇāditīrthav.*, fol. 91*b*; 90. *balākatīrthav.*, fol. 92*a*; 91. *manyutīrthav.*, fol. 93*a*; 92. *śvetaparvate śākalyasārasvataparaśuvaishṇavatīrthav.*, fol. 94*b*; 92.* *pavamānaciccikakoṭitīrthav.*, fol. 95*b*; 93. *bhadratīrthav.*, fol. 96*b*; 94. *patatrītīrthav.*, ib.; 95. *vipranārāyaṇatīrthav.*, fol. 97*b*; 95.* *bhānvādiśatatīrthav.*, fol. 98*b*; 96. *vyādhatīrthav.*, fol. 99*b*; 97. *mṛitasaṃjīvanasakuṇḍalacakshustīrthav.*, fol. 101*b*; 98. *mṛiḍaśārṅgapāṇipāśavimocana-urvaśītīrthav.*, fol. 103*a*; 99. *saptadhāsāgarasaṃgamav.*, fol. 103*b*; 100. *ṛishisattratīrthav.*, fol. 104*b*; 101. *gaṅgāsāgaratīrthav.*, fol. 105*b*; 102. *rahasyavarṇanam*, fol. 107*b*.

For the *Kaṇḍūpākhyānam*, assigned in Lassen's Anthologia Sanscritica (2nd ed., pp. 48–58) to this work, see above, p. 1231*a*.

It ends (*Ān.* ed., p. 409):

यस्यैतत्तिष्ठति गेहे पुराणं ब्रह्मणोदितं ।
न भयं विद्यते तस्य कलेः कालस्य वा क्वचित् ॥
यस्य कस्यापि नाख्येयं पुराणं ब्रह्मणोदितं ।
श्रद्दधानाय शांताय वैष्णवाय महात्मने ॥
इदं कीर्त्यं भुक्तिमुक्तिप्रदं श्रीब्रह्मशासनं ।
एतच्छ्रवणमात्रेण कृतकृत्यो भवेन्नरः ॥ ६३ ॥

इति श्रीमद्ब्रह्मपुराणे गौतमीमहात्म्ये (thus always) रहस्यवर्णनं नाम द्विशततमोऽध्यायः ॥ १०२ ॥ श्रीगौतमीमहात्म्यं समाप्तं ॥ ० शके १७०११ सौम्यनामाब्दे कार्त्तिके मासि श्री-

गोदावर्यां श्रीनृसिंहसंनिधौ शुक्लपक्षे अष्टम्यां भानुवासरे ऐलापुरस्थकमलाकरोपनामकभवानीभट्टसूरिसूनुना भीकंभट्टशर्मणालेखि ॥ विजयादशमीमारभ्य ऊर्जाष्टमीपर्यंतं समाप्तिमगमत् ॥ श्रीगोदावरी प्रसन्नास्तु ॥ अध्याय १०५(!) ग्रंथसंख्या ७००० ॥

[MACKENZIE COLLECTION.]

3408.

2677. Foll. 141; quarto, size 9¾ in. by 6¾ in.; modern Telugu handwriting; 16–27 lines in a page.

Gautamīmāhātmya. Adhyāyas 1–48. [B.]

The last chapter (48) corresponds to ch. 46 of A; the two preceding chapters—viz. 46. *mārkaṇḍeyeśvaramṛikaṇḍvīśvarabrahmeśvarādi-tīrthavarṇanam* (begins fol. 104*a*), and 47. *brahmagirimahimānuvarṇanam* (beg. fol. 109*b*)—being new to the matter contained in A.

The MS. consists of seven different batches, each of which is paged separately; and the last of these batches (foll. 119–141) should follow immediately after fol. 103, as it completes there ch. 39, and runs on to the end of ch. 45.

The text of this MS. offers a great variety of different readings, being more in accordance with the printed text. It begins:

नारद उवाच ॥

तपसां यज्ञदानानां तीर्थानां पावनं शुभं (तपसो °स्मृतं [ed.)।
इति श्रुतं मया त्वत्तस्तीर्थानां चरितं पुनः ॥
श्रोतुमिच्छामि तत्सर्वं वद सत्यं सुरेश्वर ।
सर्वेषामेव तीर्थानां सर्वदा किं विशिष्यते ॥

ब्रह्मोवाच ॥

चतुर्विधानि तीर्थानि मुने वक्ष्यामि तत्वतः ।
शृणुष्व मुनिशार्दूल दैवतान्यासुराणि च ॥
मानुषाणि च लोकेषु विख्यातानि सुरादिभिः ।
मानुषेभ्यश्च तीर्थेभ्य आर्षं तु बहुपुण्यदं ॥
आर्षेभ्यश्चापि तीर्थेभ्य आसुरं पुण्यमुच्यते ।
यदेकं जायते तत्र नास्मात्तीर्थात्परं विदुः ॥
त्रयाणामपि लोकानां तीर्थमाहात्म्यमुत्तमं ।
विश्रुतं मर्त्यलोके यत्तीर्थं बहुगुणोदयं ॥
कर्मभूमिर्यतः पुत्र तस्मात्तीर्थं तदुच्यते ।
जांबवे भारतं वर्षं तीर्थं श्रुतिषु चोदितं ॥
तत्रैव सर्वतीर्थानि उत्तमानि मया तव ।
तेषां भेदं च संक्षेपात्कथ्यमानमितः शृणु ॥
दैवासुराणि चार्षाणि मानुषाणीति भेदतः ।
हिमवद्विंध्ययोर्मध्ये यानद्यो देवसंभवाः ॥
तथैव देवजा ब्रह्मन् दक्षिणार्णववविंध्ययोः ।
एता द्वादश नद्यस्तु प्राधान्येन प्रकीर्तिताः ॥ °

[MACKENZIE COLLECTION.]

3409.

2618e. Foll. 19; size 4to, 9 in. by 7¼ in.; modern Telugu handwriting; twenty lines in a page.

Maṇimaṇḍapa-māhātmya, a legendary account of a shrine of *Kṛishṇa* at the village of Manapalūr, in the Veṅkaṭagiri district; in 12 *adhyāyas*, assigned to the *Nāradīyasaṃhitā* (or *Nāradaśaunakasaṃvāda*) of the *Brahmapurāṇa*. See Wilson, Mack. Coll., *Māhātmyas*, no. 72.

It begins:

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतं ।
विघ्नं निघ्नंति सततं विष्वक्सेनं तमाश्रये ॥

शंकराच्चितपादाब्जं पंकजाननवंदितं ।
किंकरीकृतदेवेशं वेंकटेशमहं भजे ॥

सत्या(?सत्यं) जांबवतीनाथं सत्यानंदस्वरूपिणं ।
स्मृत्या भृत्येष्टदं विष्णुं नित्यं कृष्णमहं भजे ॥

श्रीमद्भिस्तालहिंतालबालसालरसालकैः ।
नागकेसरपुंनागकेतकीभिर्विराजितं ॥

वकुलामोदमंदारकुंदवृंदसमन्वितं ।
अनेकमृगसंकीर्णं नानाद्विजसमाकुलं ॥

नदीनदह्रदैर्युक्तं सदा सन्मुनिसेवितं ।
नैमिशारण्यमित्यासीत्तस्मिन् क्षेत्रे महातपाः ।
शौनकः कर्तुमारेभे सत्रं द्वादशवार्षिकं ॥
तत्समालोकितुं सर्वे समाजग्मुर्महर्षयः ।
विमत्सरास्ते तत्रैव शौनकेन सह स्थिताः ॥
ततस्तीर्थाटनासक्तः सम्यग्ध्यानविशारदः ।
समाजगाम देवर्षिर्नारदः शौनकाश्रमं ॥
प्रत्युत्थाय प्रणत्याथ पूजां कृत्वा यथाविधि ।
पृष्ट्वा च कुशलप्रश्नं शौनकः प्राह नारदं ॥

शौनकः ॥

भगवन्नद्य मे प्राप्तं तपस्त्विष्टदायिनः ।
फलं यदागता यूयं मदनुग्रहकाम्यया ॥
भगवद्भक्तवर्याणां भवता मटसंक्षितौ (?मठ°) ।
व्योम्नि भागाश्च सर्वेषां तमःस्तोमनिवृत्तये ॥
तीर्थाटनं प्रकुर्वद्भिर्युष्मद्भिरवनीतले ।
कानि क्षेत्राणि दृष्टानि हरेरद्भुतकर्मणः ॥
कुत्र संनिहितो विष्णुर्भगवान् हरिरव्ययः ।
तन्मे ब्रूहीति मुनिना पृष्टः स नारदोऽब्रवीत् ॥

नारदः ॥

धन्यस्त्वं मुनिशार्दूल यत्ते विष्णुकथारतिः ।
प्रश्नेन महता प्रीतिर्जाता मे वर्णितुं हरिं ॥
मया संचरता भूमौ सेवितो मणिमंटपे(!) ।
सत्यभामाजांबवतीयुक्तः कृष्णो जगत्पतिः ॥ °

It ends:

काश्यां मुक्तिर्मृतेरेव क्षेत्रैर्नै मुनिसत्तम ।
शिवं क्षेत्राधिकं तस्मान्मणिमंटपसंज्ञिकं (°कात्) ॥
अयोध्यादिपुरीभ्यश्च सप्तभ्यो ह्यधिकं भुवि ।
तस्मात्तत्सदृशं क्षेत्रं न दृष्टं नापि च श्रुतं ॥
मणिमंटपमाहात्म्यं तीर्थानां च विशेषतः ।
यः शृणोति सकृद्भक्त्या सर्वपापैः प्रमुच्यते ॥
शृणोति संश्रावयतीदमद्भुतं
यो वा मुकुंदस्य शुभं चरित्रं ।
आरोग्यमायुष्यमशेषमंगलं
स वै समाप्नोति हरेश्च भक्तिं ॥

इति ब्रह्मपुराणे नारदीय्यसंहितायां मणिमंटपमाहात्म्ये द्वादशोऽध्यायः ॥

[MACKENZIE COLLECTION.]

3410.

334. Foll. 725; size 12¼ in. by 5¾ in.; clear Devanāgarī writing of 1798 A.D.; 12 or 13 lines in a page.

Brahmavaivartapurāṇa, in four *khaṇḍas*, with separate numbering of leaves.

See Aufrecht, Cat. Bodl., nos. 65, 66. For an account of the work see H. H. Wilson, Works, iii., p. 91 seqq.

I. *Brahmakhaṇḍa*, in 30 *adhyāyas*, foll. 63 (and an extra leaf after fol. 29; from fol. 59 wrongly numbered 49, etc.), begins:

गणेशब्रह्मेशसुरेशशेषाः
सुराश्च सर्वे मनवो मुनीन्द्राः ।
सरस्वतीश्रीगिरिजादिकाश्च
नमन्ति देवं प्रणमामि तं विभुम् ॥ १ ॥

स्थूलां तनूं विदधतं त्रिगुणं विराजं
विश्वानि लोमविवरेषु महान्तमाद्यम् ।
मृत्युन्मुखः सकलयापि ससर्ज सृष्ट्वा
नित्यां समेत्य समयस्(सरयं MS. 339; हृदये [R. M.) तमजं भजामि ॥ २ ॥ °

Cf. Rāj. Mitra, Notices, iii., p. 236.

II. *Prakṛitikhaṇḍa*, in 63 *adhyāyas*, foll. 161 (counted 162, no. 22 being passed over), begins: नारद उवाच ॥

गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पंचधा स्मृता ॥ १ ॥

Cf. Notices, iii., p. 227.

Colophon: इति श्रीब्रह्मवैवर्तपुराणे नारायणनारदसंवादे प्रकृतिखंडे दुर्गोपाख्याने प्रकृतिकवचं नाम त्रिषष्टितमोऽध्यायः ॥

III. *Kṛishṇajanmakhaṇḍa*, in 132 *adhyāyas*, foll. 410 (counted 411, no. 273 being passed over), begins: नारद उवाच ॥

श्रुतं प्रथमतो ब्रह्मन् ब्रह्मखंडं मनोहरं ।
ब्रह्मणो वदनांभोजात् परमाद्भुतमेव च ॥ १ ॥

ततस्तद्वचनं तूर्णं समागत्य तवान्तिकं ।
श्रुतं प्रकृतिखण्डं च सुधाखण्डात्परं परं ॥ २ ॥

Cf. Notices, ix., p. 29.

Colophon: इति ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे सूतशौनकसंवादे द्वात्रिंशदधिकशतको ऽध्यायः ॥

IV. *Gaṇapatikhaṇḍa* (also called *Gaṇeśa-khaṇḍa*), in 45 *adhyāyas*, foll. 90, begins:

नारायणं नमस्कृत्य ० ॥

नारद उवाच ॥ श्रुतं प्रकृतिखण्डं ० Cf. Notices, iii., p. 240.

Colophon: इति श्रीब्रह्मवैवर्ते महापुराणे नारायण-नारदसंवादे गणपतिखंडे पंचचत्वारिंशत्तमो ऽध्यायः ॥

Khaṇḍas II. and III. have been exchanged by the binder.

Two editions of this work have appeared in India (Calc. 1881–87, 1888).

[H. T. Colebrooke.]

3411.

339a. Foll. 53; size 12 in. by 5¼ in.; fairly good Devanāgarī writing of 1802 A.D.; twelve lines in a page.

Brahmavaivartapurāṇa. The *Brahmakhaṇḍa.*

Copied by a certain *Nandarāma Pāṭhaka.*

[H. T. Colebrooke.]

3412.

2198. Foll. 483; size 11½ in. by 5 in.; good Devanāgarī writing of about 1750 A.D.; 9 or 10 lines in a page.

Brahmavaivartapurāṇa. The *Kṛishṇajanma-khaṇḍa.*

Several separate editions of this *Khaṇḍa* have appeared in India.

[Gaikawar.]

3413.

1308. Foll. 333; size 12½ in. by 6 in.; fair, modern Devanāgarī writing; thirteen lines in a page.

Kṛishṇajanmakhaṇḍa of *Brahmavaivarta-purāṇa.* [H. T. Colebrooke.]

3414.

1096. Foll. 135; size 12 in. by 6 in.; clear Devanāgarī writing of 1802 A.D.

Brahmavaivartapurāṇa. The *Gaṇapatikhaṇḍa.*

[H. T. Colebrooke.]

3415.

339b. Foll. 61; size 12 in. by 5¼ in.; fair Devanāgarī writing of 1803 A.D. (foll. 1–32 apparently by a different, somewhat older hand); 15 or 16 lines in a page.

Kāśīmāhātmya, in 26 *adhyāyas*, professing to form part of Part III. (*tṛitīya-vibhāga*) of the *Brahmavaivartapurāṇa.*

It begins:

भवानीतनयाद्याद्यतनयानंददायकं ।
काशिवासिजनाघौघहारिन् ढुंढे नमो ऽस्तु ते ॥

See Aufrecht, Cat. Bodl., no. 70. The work has been published at Benares (1865) under the title of *Kāśīrahasya.*

It ends:

यथा मनुष्यदेहे ऽस्मि शोधिते मातिवस्तुतः ।
तथा शृणुध्वमाश्चर्यं क्व मेरुः सर्षपोदरे ॥

इति श्रीब्रह्मवैवर्ते तृतीयविभागे रहस्यातिरहस्ये काशी-माहात्म्ये षड्विंशो ऽध्यायः ॥ संवत् १८६० पौषे मासे शुक्लपक्षे चतुर्दश्यां भौमवासरे ॥

लिखित्वा शिवप्रसादो ब्राह्मणः कान्यकुब्जकः ।
काश्यां मध्ये गंगातटे शुभं समाप्तमगमत् ॥

In Dr. Burnell's Tanjore Cat. (as apparently in S. India generally), this treatise is (p. 189) also referred to the *Brahmakaivartapurāṇa*,* of which it is stated to form the third (and last) *bhāga*; the two others being the *pūrva-bhāga* and the *madhyama-* or *rahasyabhāga*.

[H. T. Colebrooke.]

3416.

2709. Foll. 61; size 7¼ in. by 4½ in.; carelessly written, in Devanāgarī, by several modern hands; 9–14 lines in a page.

Ghaṭikācala-māhātmya, 'a legendary description of the *Ghaṭika* mountain near Chitore, west of Madras, where a temple is erected to *Nṛisiṃha*, or *Vishṇu* in that form' (Wilson, Mackenzie Collection, i. 70); professing, in the colophons, to form part of the *Brahmakaivarta-purāṇa*. *Adhyāyas* 11–20.

Adhy. XI. begins: अगस्त्यः ॥

गिरेः प्रदक्षिणं कार्यं पुंसा यत्किंचिदीप्सितं ।
ब्रह्मतीर्थादिका सर्वा स्नातव्या दीर्घिका सदा ॥

वामदेवः ॥

कस्मिंस्तीर्थे कृतस्नानः कर्म विद्वान् लभेत्सदा ।
प्रदक्षिणं प्रकुरुतः गिरेरस्य तटे तथा ॥

अगस्त्यः ॥

प्रदक्षिणद्वयं तत्र विज्ञेयं नगसत्तमे ।
महाप्रदक्षिणं विद्वन्नांतरं च यथाक्रमं ॥ ०

Thus *Agastya* remains throughout the chief speaker. The work is not complete with the 20th *adhyāya*.

It ends:

उपदिष्टस्तु प्रह्लादो नाम्नामुच्चारणात्ततः ।
उन्मज्य वाससेनागत्य जग्राह चरणे पितुः ॥

इति श्रीब्रह्मकैवर्ते घटिकाचलमाहात्म्ये विंशो ऽध्यायः ॥

[Mackenzie Collection.]

3417.

2618 b. Foll. 14; size 4to, 9¾ in. by 7¼ in.; modern, cursive Telugu handwriting; 20–23 lines in a page.

Sarpapurakshetramāhātmya—also wrongly called *Sarvapurakshetramāhātmya*—a legendary account of *Sarvapura*(?), a holy place in the *Rājamahendrī* (*Rājamundry*) *sircar* (Wilson, Mack. Coll., 2nd ed., p. 145); forming *adhyāyas* 52–56 of the (*Agastya-śaunakasaṃvāda* of the) *Brahmakaivartapurāṇa*.

It begins: अंबरीषः ॥

श्रीमन् सर्वेश्वर(*r.* सर्पपुर)क्षेत्रमाहात्म्यं कथयस्व मे ।
कुतः सर्पपुराख्यानं(? MS. सर्व०) क्षेत्रस्यास्य बभूव ह ॥

सरोनाम्नां च किं मूलं भावनारायणो हरिः ।
किमर्थमत्र स्थितवानयं केन प्रतिष्ठितः ॥

एतदाचक्ष्व सर्वं मे श्रोतुं कौतूहलं मुने ।

वशिष्ठः ॥

राजन् सम्यक् त्वया पृष्टं शौनकाय महात्मने ॥

गतेन नैमिशारण्यमगस्त्येनैवमीरितं ।
तदेवाहं प्रवक्ष्यामि समाहितमनाः शृणु ॥

अथासीद्गौतमीतीरे नैमिशारण्यमद्भुतं ।
महर्षिजनसंयुष्टं फलपुष्पद्रुमान्वितं ॥ ०

---

* The treatises professing to belong to this *Purāṇa* have (contrary to the alphabetical order) been placed after the *Brahmavaivarta*, because it seemed desirable to keep the *Kāśīmāhātmya* between the two, as it is claimed by both—the MS. noted by Burnell (p. 189*b*, *sub* 1669) under the *Brahmakaivarta* beginning in the same way as the present work—and because the designation '*Brahmakaivarta*' (peculiar to S. India) seems to be nothing more than a Southern term for the Northern *Brahmavaivarta*, as, indeed, it has been treated in Wilson's 'Mackenzie Collection.' The latter term does not seem to occur either in Oppert's Lists or in Taylor's Cat. Rais.; and the MSS. assigned to it in the Tanjore Cat. were probably derived from Northern India.—Ed.

Page 4 : शौनकः ॥

कथं सर्पपुराख्यानं* तस्यासीत्कलशोद्भव ।
सरमां चैव नामानि कथमासन्महामुने ॥
किमर्थं नारदस्तत्र प्रतिष्ठापितवान् हरिं ।
विस्तरेण ममाचक्ष श्रोत्रं मे श्रवणोत्सुकं ॥

अगस्त्यः ॥

कश्यपस्य सुताः पूर्वं काद्रवेया महौजसः ।
सर्परूपधरा आसन् सहस्रं मुनिसत्तम ॥
कदाचिदशपन्माता सुतानमितवर्चसः ।
कुतश्चित्कारणाद्यूयं वह्निदग्धा भविष्यथ ॥

The king of serpents then appeals to *Hari Nārāyaṇa*, and is told that he is to be called *Ananta*, and to serve as the perpetual couch of the god. P. 6 :—

सर्पत्वाद्भवतः पुत्र क्षेत्रं सर्प(or सर्व)पुराभिधं ॥
त्रिषु लोकेषु विख्यातं भविष्यति न संशयः ।
अहमप्यत्र वत्स्यामि कुतश्चित्कारणादहो ॥

अगस्त्यः ॥

इति वचनमुदारं प्रेमपूर्वं गदित्वा
भुजगपतिमदांतार्थी(r. त्मा)नमापत् सुरेंद्रः ।
हरिरखिलगुणानामाश्रयो भक्तताग्रं(!)
प्रतिदिनमिदमीरन्मुच्यते जन्मबंधैः ॥

इति० द्विपंचाशाध्यायः ॥ p. 7.

It ends : अगस्त्यः ॥

नारदं भगवानेवमुक्त्वा देवान्मुनीनपि ।
आज्ञापयामास मुने गमनाय यथागतं ॥
ततो देवाः सगंधर्वा नारदाद्या महर्षयः ।
भावनारायणं नत्वा प्रययुस्ते यथागतं ॥
अस्मिन् सर्पपुरक्षेत्रे* पंचक्रोशचतुःसमे ।
सत्यरूपाश्च देवर्षे सर्वे स्थावरजंगमाः ॥
अस्मिन्क्षेत्रे तु यो मर्त्यस्त्रिरात्रं निवसेद्यदि ।
अश्वमेधसहस्राणां फलमाप्नोति नारद ॥ ० ॥

मुक्त्वा सरसि स्नात्वा दृष्ट्वा नारायणं नरः ।
शुभसंततिमाप्नोति न चेह जायते पुनः ॥
एतत्क्षेत्रस्य माहात्म्यं पठन् शृण्वन् लिखन्नरः ।
विष्णुलोकमवाप्नोति मुनिपुंगव शौनक ॥

वशिष्ठः । इति
भुजगपतिपुराख्यक्षेत्रमाहात्म्यमुक्तं(r. ० क्ता)
वचनमखिलतत्त्वज्ञानपूर्णो मुनींद्रः ।
कलशभवपदारं त्वीरयन् शौनकार्यं
नरवरपरितोषं प्रापयामास सद्यः ॥

इति श्रीब्रह्मकैवर्तमहापुराणे अगस्त्यशौनकसंवादे सर्व(or सर्प)पुरक्षेत्रमाहात्म्ये षट्पंचाशो ऽध्यायः ॥

On the fly-leaf the work is called, in Telugu characters, *Sarpapurakshetramāhātmyam ;* and in English characters, '*Sarapoora Chatra Mhatiam.*' [MACKENZIE COLLECTION.]

3418, 3419.

2842a & c. Size 4to, 9½ in. by 7 in.; modern Telugu handwriting; 14–16 lines in a page.

Two *Māhātmyas*, claiming to form part of the *Brahmakaivartapurāṇa*, viz. :—

a. *Sarpapura* (or *Sarvapura*)-*kshetramāhātmya*, foll. 19 (paged 1–38). The 1st of the five chapters of the preceding MS. is here omitted.

It begins : शौनकः ॥

भगवन्नद्भुतमिदं शृण्वतो मे न जायते ।
तृप्तिः कुंभसमुद्भूत पुरातन महामुने ॥
कुतश्चित्कारणादत्र वत्स्यामीत्युरगाधिपं ।
प्रत्यब्रवीन्महातेजा भगवानादिपूरुषः ॥
इति त्वयेरितं तात किं तत्कारणमद्भुतं ।
हरिराश्रितमंदारो नारदेन प्रतिष्ठितः ॥
इति पूर्वं त्वयैवोक्तं तदाचक्ष्व महामुने ।

अगस्त्यः ॥ सत्यमुक्तं मुनिश्रेष्ठ प्रतिष्ठापितवान् हरिं ॥
नारदः पूर्वमिति यत्तदेवागमिकारणं ।
उवाच पन्नगेशाय भगवानखिलार्थवित् ॥
तस्मात्तदर्थं भगवान्नारदेन प्रतिष्ठितः ।
तदेवाहं प्रवक्ष्यामि शृणुष्वावहितो मुने ॥ ०

* Whilst in most cases where the name appears, the second letter of the ligature is written below the र, and the proper reading of the name remains doubtful owing to the great similarity (or practical identity) of the signs for र्व and र्प, in this and some other passages the *r* is written after the *p*, all ambiguity being thus avoided. The final *śloka* also leaves no doubt as to the correct spelling of the name.

In the list of contents on the fly-leaf of the volume, the treatise is referred to as '*Surpapoorachatramahateyem*, legendary account of the holy place *Survapoorachatrum*.'

c. *Garuḍācala-māhātmya*, or *Upamākā(kshetra)-māhātmya*, a legendary account of the mountain of Garura, and a shrine, in the Rājamahendrī district (cf. Wilson, Mack. Coll., 2nd ed., p. 133), in four *adhyāyas*; foll. 15 (paged 1–30). It begins:

कदाचित्नैमिशारण्ये समेता ऋषयो ऽनघाः ।
गरुडाचलमाहात्म्यतत्त्वजिज्ञासयान्विताः ।
सूत – – (lacuna) व्यासशिष्यं महामुनिं ॥

ऋषय ऊचुः ॥
सूत सर्वार्थतत्त्वज्ञ सर्वशास्त्रविशारद ।
व्यासप्रेमाधिकरणसूक्ष्मप्रेक्षावतां वर ॥
त्वत्तः श्रुताः कथा रम्या हृदि तिष्ठंत्यविस्मृताः ।
त्वं हि नः परमो बंधुस्त्वं नो द्वापरभेदकः ॥
अस्माकं काचिदिच्छास्ति तां पूरय महामते ।
सूतः ॥ युष्माकं मे [हि] कारुण्यमदभ्रं वर्तते सदा ॥
मत्तस्तु यदि युष्माकं वांछा यदि हतांहसः ।
आज्ञापयत मा तूर्णं त्वदिष्टकरणो ह्यहं ॥

ऋषय ऊचुः ॥
क्रोशमात्रे मरिद्वर्तुरुपमाकेति विश्रुता ।
नगरी वर्तते तत्र गरुडाख्यो नगो महान् ॥
तत्रास्ते वेंकटाद्रीशः श्रीनिवासः परात्परः ।
स्वभक्तनिकराभीष्टदायकः पद्मया सह ॥
निग्रहानुग्रहे दक्षः प्रजापतिमुखैः सुरैः ।
वंद्यमानपदांभोजः कलिदोषनिवर्तकः ।
मनुष्यलीलया तत्र सर्वभोगान् भुनक्ति वै ॥
कुतस्त्राविरभवच्छ्रीनिवासः परात्परः ।
बंधुराज्यस्य सरसो माहात्म्यं तार्क्ष्यभृतः ॥
कृष्णद्वैपायनमुखाद्यया वै भवता श्रुतं ।
तथा ब्रूहि महाभाग श्रोतुं कौतूहलं हि नः ॥

सूत उवाच ॥
माहात्म्यमुपमाकायाः प्रवक्तुं बहुवत्सरैः ।
न शक्यं पद्मजेनापि किमुतास्मादृशैर्नृभिः ॥
तथापि युष्मत्कारुण्यकटाक्षपरिपूरितः ।
कथयामि यथामंविच्छ्रूयतामृषयो ऽनघाः ॥

It ends:

इति पूर्वं मुनीनां तु सन्निधौ हरिणोदितं ।
तस्मात्सर्वोत्तमं क्षेत्रं ह्यैनुग्रहदायकं ॥
तस्मान्महोत्तमक्षेत्रमाहात्म्यं मुनिपुंगवाः ।
पठनीयं लसद्भक्त्या भुक्तिमुक्तिप्रदायकं ॥
इति श्रीब्रह्मकैवर्तपुराणे गरुडाचलमाहात्म्ये चतुर्थो ऽध्यायः ॥

In the heading title, the tract is called '*Vupamākakshetramāhātmya*'; and on the fly-leaf, '*Vopacachatramahatam* in the Dorogul country.' [Mackenzie Collection.]

3420.

2619b. Foll. 82; size 4to, 10 in. by 6¾ in.; modern, cursive Telugu handwriting; 32–39 lines in a page.

Dakshiṇakālīpura-māhātmya, a legendary account of a temple dedicated to the goddess *Kālī* at Śivagaṅga; professing to form part (of the *uttarabhāga*) of the *Brahmakaivarta-purāṇa*. Thirty-two *adhyāyas*.

It begins:

इष्टार्थविघ्नसिद्ध्यर्थं शिष्टाराध[नचो]दितः ।
यजे शृंगारविघ्नेशं भजे वागर्थसिद्धये ॥
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषं ।
पराशरात्मजं वंदे शुकतातं तपोनिधिं ॥
सूतः ॥ श्रीमत्कैलासशैलाग्रे शिखरैर्बहुभिर्युते ।
शिवंकरे त्रिजगतां शिवावासे चिरंतने ॥
नित्यपुष्पैर्नित्यफलैः कल्पवृक्षैः सुवेष्टिते ।
देवर्षियक्षगंधर्वसिद्धचारणसेविते ॥ ०

It ends:

इदं (*r.* एतद्) दक्षिणकालिकापुरविभोर्ज्योतिर्वनोद्भासिनो
लिंगाकारविराजमानमहसः श्रीस्वर्णवल्लीपतेः ।
माहात्म्यं कलुषापहं शुभकरं श्रुत्वा मुनींद्रा मुदा
तत्रागत्य च दर्शनं च विदधुः काशीश्वराद्यर्चनं ॥

इति श्रीब्रह्मकैवर्तमहापुराणे उत्तरभागे शिवक्षेत्रप्रशंसायां दक्षिणकालीपुरमाहात्म्ये काशीश्वरप्रसादो नाम द्वात्रिंशोध्यायः ॥

[Mackenzie Collection.]

3421.

2619c. Foll. 21; size and handwriting as of preceding MS.

Pushpavana-māhātmya, professing to form *adhyāyas* 71–85 (of the *Śatarudrīyasaṃhitā*) of the *pūrvabhāga* of the *Brahmakaivartapurāṇa*.

It begins:

श्रीमत्पुष्पवनेशानं सच्चिदानंदविग्रहं ।
प्रल[य]स्थितिसर्गाणां कर्तारं नौमि शंकरं ॥

शौनकः ॥

यच्छ्रुतं मे वनाख्यातं(?°नं) भवता कथितं पुरा ।
तन्मध्ये संग्रहेणोक्तं श्रीपुष्पवनवैभवं ॥

कथितं सूत सर्वज्ञ विस्मृत्य वद सर्वदा ।
सहेतुकं च वृत्तांतं तत्राश्चर्यं कथाश्च याः ॥

भवत्कृपायाः पात्रं मां विदित्वा कृपयाधुना ।
त्वां विनान्यं न पश्यामि त्वमेव गतिरद्य मे ॥

मां पुरस्कृत्य वर्तंते बहुशो मुनिपुंगवाः ।
पाल्यतां च वचो मे[ऽ]द्य(त्) त्वत्समो ऽन्यो न कश्चन ॥

सूतः ॥ शृणु द्विज महाप्राज्ञ सर्वज्ञस्त्वं न संशयः ।
तथापि मां गुरुं कर्तुमेवमेवंविदिष्यसि(*r.*°दिच्छसि) ॥

यावज्ज्ञातं मया विप्र यावन्मे गुरुणोदितं ।
एवमेव पुरा वृत्तं नंदिने च समीरितं ॥

गुहेन भक्तियुक्तेन कैलासे देवपूजिते ।
सेविते मुनिवृंदैश्च देवेंद्राम(?°द्रैर)मरैरपि ॥

It ends:

य इदं पुष्पकांतारमाहात्म्यं शृणुयान्नरः ।
तस्य पुण्यफलं वक्तुं न शक्यं दैवतैरपि ॥

ये पठंति तदाख्यानं ये शृण्वंति नरोत्तमाः ।
तेषां निवासं कैलासे सत्यं सत्यं वदाम्यहं ॥

पुत्रहीनो लभेत्पुत्रं धनहीनो लभेद्धनं ।
रोगी विमुच्यते रोगात् पापी पापाद्विमुच्यते ।
तस्मात्सर्वप्रमुक्तेन श्रोतव्यं पुण्यकांक्षिभिः ॥

इति श्रीब्रह्मकैवर्तमहापुराणे पूर्वभागे शतरुद्रीयसंहितायां भास्करक्षेत्रे पुष्पवनमाहात्म्ये रहस्यचिदंबरोपदेशं नाम पंचाशीतितमो ऽध्यायः ॥

Cf. Wilson, Mack. Coll., 2nd ed., p. 138.

[Mackenzie Collection.]

3422.

2617. Foll. 43; size 4to, $10\frac{3}{4}$ in. by $7\frac{3}{4}$ in.; modern, cursive Telugu handwriting; about thirty lines in a page.

Maṅgalagiri-māhātmya, a legendary account of a temple of *Vishṇu* (*Narasiṃha*), and other sacred places on the Maṅgalagiri in the Guntur district; professing to form part of the (*Bhavānīśaṅkaragītā* of the) *Brahmakaivarta-purāṇa*.

Rather incorrect. It begins:

व्यासं वशिष्ठनप्तारं शक्तेः पौत्रमकल्मषं ।
पराशरात्मजं वंदे शुकतातं तपोनिधिं ॥

पार्वत्युवाच ॥

महादेव महाभाग नारदाद्यमहर्षयः ।
जीवन्मुक्तिमवापुस्ते परमेश्वरभक्तितः ॥

प्राक् त्वन्मुखांबुजाच्छ्रुत्वा स्वयंवेक्तस्यलाधिकं(? *i.e.* सर्वपापहरं दिव्यं मर्त्यलोकसुपावनं ॥ [स्वयंव्यक्त°)।

श्रीरुग्नमाद्यं(!) श्रीमुष्णं नैमिशं पुष्करं वरं ।
नीलग्रामाद्रिस्तोताद्रिर्वेंकटाद्रिमनोरमः (° द्रिर्वेंकटा-
नरनारायणवाहि(!) दिव्यबदरिकाश्रमं । [द्रिर्मे°) ॥
यक्षगंधर्वगरुडकिन्नरोरगसेवितं ॥

एते श्रेष्ठ स्वयंवेक्ता(° व्यक्ता) भूलोके संति शंकर ।
एतेषां चरितं वक्तुं त्वमर्हसि ममाधुना ॥

पुरा स्वयंवेक्त(° व्यक्त) इति तोताद्रिः श्रेष्ठ उच्यते ।
त्वयेदानीं तच्चरितं सम्यग्वद सविस्तरं ॥

It consists of 22 *adhyāyas*, arranged in the following order: (*a*) foll. 23–44, from the beginning to the middle of *adhy.* 12 (the end of the first *adhyāya* being, however, not marked); (*b*) foll. 12 to middle of 20*a*, from the middle of *adhy.* 12 to middle of *adhy.* 16; (*c*) foll. 1–11, from there to the end of *adhy.* 21; (*d*) foll. 20*a*–22*b*, *adhy.* 22.

It ends:

त्रिकालं संप्रपूज्यैव हरिभक्तिपरायणाः ।
ते सर्वबंधविमुक्ता हरिसालोक्यमाययुः ॥

यथा परंपराप्राप्ता पूजा तव मयेरिता ।
वर्तदेद्यावि(? वर्तते ऽद्यापि) तोताद्रौ वैष्णवे नगनंदने ॥

इति ब्रह्मकैवर्ते भवानीशंकरगीतायां पूजाविधिक्रमो नाम द्वाविंशो ऽध्यायः ॥

The name '*Mañgalagiri*' itself does not seem to be mentioned in the work, but only different hills and *tīrthas*.

[MACKENZIE COLLECTION.]

3423.

2580 c. Foll. 15 (paged 1–29); size folio, $11\frac{3}{4}$ in. by $8\frac{3}{4}$ in.; modern Telugu writing; 25–43 lines in a page.

Goshṭhīvana-māhātmya, forming *adhy.* 51–60 of some section of the *Brahmakaivartapurāṇa*.

It begins: श्रीशौनकादयः ॥

श्रीनिवासस्य देवस्य क्षेत्राणां परमं शुभं ।
माहात्म्यं भारते वर्षे त्वया चोक्तं महात्मना ॥
अस्माभिश्च श्रुतं सूत त्वत्समागमकारणात् ।
कृतार्थास्तु वयं सर्वे सत्कथाश्रवणेन च ॥
रंगक्षेत्रस्य माहात्म्यं वेंकटाचलवैभवं ।
माहात्म्यं तुंगभद्रायाश्चास्माभिः श्रूयते पुरा ॥
गोष्ठीवनस्य माहात्म्यं मोक्षसाधनमुत्तमं ।
इदानीं श्रोतुमिच्छामस्तद्वदस्व तपोधन ॥

सूत उवाच ।
पुरा कैलासशिखरे त्रिपुरघ्नं त्रिलोचनं ।
पप्रच्छ गिरिजा देवी सर्वेषां हितकाम्यया ॥
गोष्ठीवनस्य माहात्म्यं गुह्यं गुह्यतमं परं ।
आचचक्ष स पार्वत्यै देवदेवो महेश्वरः ॥
युष्माकं तच्च वक्ष्यामि माहात्म्यमघनाशनं ।
शृणुध्वं मुनयः सर्वे चित्तैकाग्रसमाधिना ॥

पार्वत्युवाच ।
देवदेव त्रिलोकेश श्रीधरस्य जगत्पतेः ।
क्षेत्राणां भारते वर्षे माहात्म्यं श्रूयते मया ॥
श्रवणे तुंगभद्रायास्तस्यास्तीरे त्वया पुरा ।
गोष्ठीवनमिति प्रोक्तं श्रीविष्णोर्निलयं महत् ॥
तस्याहं श्रोतुमिच्छामि माहात्म्यं परमं शुभं ।
विस्तरेण समाचक्ष्व सर्वेषां मोक्षहेतवे ॥

महेश्वर उवाच ॥
गुह्यं गुह्यतमं लोके गोष्ठीवनमनुत्तमं ।
क्षेत्राणामुत्तमं क्षेत्रं प्रत्यक्षं परमं पदं ॥
तस्य क्षेत्रस्य माहात्म्यं वक्तुं विस्तरशस्तव ।
न शक्यते वर्षशतैर्मया संक्षेपतः शृणु ॥
पूर्वाभोधेः पश्चिमे तु क्षेत्रं षट्क्रोशदूरगे ।
तुंगभद्रातटे देवि गोष्ठीवनमिति श्रुतं ॥
योजनद्वयपर्यंतं तत्क्षेत्रं परमं महत् ।
श्रिया सहात्र स्थितवान् साक्षान्नारायणो हरिः ॥
ब्रह्मादयः सर्वदेवा ऋषयश्चामलाशयाः ।
तत्र स्थित्वा देवदेवमुपासते परं विभुं ॥
योजनद्वयमध्ये तु तुंगभद्रातटे शुभे ।
क्षेत्रं त्रिक्रोशपर्यंतं नारायणमयं स्मृतं ॥
तत्रस्था मानवाः सर्वे स्थावराणि चराणि च ।
नारायणस्वरूपाणि शंखचक्रगदाधरः ॥
ये त्यजंति नरा देहं तस्मिंस्त्रिक्रोशमध्यमे ।
सामीप्यमुक्तिं(!) प्राप्स्यंति क्षयमाः पापिनो ऽपि वा ॥

It ends:

धारणं चातपत्रस्य चामरग्रहणं तथा ।
ध्वजस्य ग्रहणं कृत्वा करदीपिकधारणं ॥
शिविकावाहनं(!) चापि धृत्वा तांबूलपेटिकां ।
कर्मबंधादिमुक्तस्तु प्राप्स्यते परमं पदं ॥
मुमुक्षुर्वार्थकामो वा यः कुर्याद्विष्णुसेवनं ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥
कामान्नोप्ये(!) यथा विष्णुं प्राप्नुवंति सुखेन च ।
तथा [ह्य]र्थार्थिनो देवि प्रययुः सुलभेन तं(!) ॥
क्षेत्राणामुत्तमं क्षेत्रं पारमात्म्यमनुत्तमं ।
तत्क्षेत्रस्य समं नास्ति पंचाशत्कोटिभूतले ॥
एतत्क्षेत्रप्रभावं च श्रुत्वा निष्ठापरायणाः ।
यत्कारं पूजयित्वा च यास्यंति परमां गतिं ॥
सुगुल्याभरणैश्चैव अन्नवस्त्रप्रदानतः ।
मम लोकमवाप्नोति नात्र कार्या विचारणा ॥

इति श्रीब्रह्मकैवर्तपुराणे उमामहेश्वरसंवादे गोष्ठीवनमाहात्म्ये षष्टितमो ऽध्यायः ॥

On the front fly-leaf the following title is given to the work: "*Ponnoorbhauva narraina* (? *Punarbhava Nārāyaṇa*) *swamy mahateyem*, or legendary account of the *Bhauvanarraina Swamy* god at Ponnoor village."

[MACKENZIE COLLECTION.]

3424.

3085. Foll. 199; size 9¼ in. by 5 in.; fair Devanāgarī writing of 1770 A.D.; twelve lines in a page.

Adhyātmarāmāyaṇa, a section of the *Brahmāṇḍapurāṇa*, treating of the fortunes of *Rāma*; in seven *kāṇḍas*, the leaves of which are numbered separately.

I. *Bālakāṇḍa*, foll. 21; II. *Ayodhyākāṇḍa*, foll. 32; III. *Āraṇyakāṇḍa*, foll. 25; IV. *Kishkindhākāṇḍa*, foll. 26; V. *Sundarakāṇḍa*, foll. 17; VI. *Yuddhakāṇḍa* (called *Laṅkākāṇḍa* on fol. 1*a*), foll. 50; VII. *Uttarakāṇḍa*, foll. 28.

Cf. Aufrecht, Cat. Bodl., nos. 72–74.

[J. R. Ballantyne.]

3425.

1870. Foll. 369; size 12 in. by 4 in.; clear Devanāgarī writing of 1817 A.D.; 5–7 lines in a page.

Adhyātmarāmāyaṇa.

Each *kāṇḍa* is paged separately: I. foll. 48; II. foll. 63; III. foll. 44; IV. foll. 46; V. foll. 41; VI. foll. 48; VII. foll. 51 (foll. 21–28 of which are missing). [Dr. John Taylor.]

3426.

2029. Foll. 340; size 15 in. by 6¾ in.; fair, modern Devanāgarī writing; 8–15 lines in a page.

Adhyātmarāmāyaṇa, with a commentary called *Adhyātmarāmāyaṇasetu*, by *Rāmavarman* (or *Rāmadatta*), ruler of Śṛiṅgavera, son of *Himmativarman*, and pupil of *Bhaṭṭa Nāgeśa*.

It begins:

विसेनवंशजलधौ पूर्णः शीतकरो ऽपरः ।
प्रजाह्लादकरो विष्णुभूषणः कौस्तुभो ऽपरः ॥ १ ॥

अत्र विष्णुभूषणत्वेन परमभक्ततया सदा भगवद्दयारूढतास्य ध्वनिता ॥

नाम्ना हिम्मतिवर्मोभूद् धैर्येण हिमवानिव ।
रूपेण जितकंदर्पः क्षमायां क्षमया समः ॥ २ ॥
पराक्रमे ऽर्जुनः साक्षात्तेजसा भानुमानिव ।
भूपानां भ्रष्टराज्यानां पुना राज्यप्रदायकः ॥ ३ ॥
यं दृष्ट्वाधिसमूहस्य जातेयं निश्चिता मतिः ।
हित्वा पशुत्वं स्त्रीत्वं च कामधुग्भूमिमागता ॥ ४ ॥
तस्माज्जातो रामदत्तश्चंद्राच्चंद्र इवापरः ।
मित्राणां च रिपूणां च मानदः प्रथितः प्रभुः ॥ ५ ॥ ० ७ ॥
तेन श्रीरामभक्तेन सर्वा विद्याः प्रजानता ।
शृंगवेरपुरेशेन रिपुकक्षदवाग्निना ॥ ६ ॥
अर्थिनां कल्पवृक्षेण विद्वज्जनसभासदा ।
भट्टनागेशशिष्येण वध्यते रामवर्मणा ॥ ९ ॥ ० १० ॥
सेतुः परोपकृतये ऽध्यात्मरामायणांबुधौ ।
सुशब्दमणिभिः श्वच्छैः प्रीयतां तेन राघवः ॥ ११ ॥

Cf. Rāj. Mitra, Notices, viii., p. 215; Weber, Berl. Cat., no. 465. There are several Indian editions, both of the text and the commentary.

The *Kāṇḍas* are paged separately: I. foll. 52; II. foll. 54; III. foll. 40; IV. foll. 39; V. foll. 25; VI. foll. 74; VII. foll. 56.

[Gaikawar.]

3427.

2725. Foll. 326; size 13 in. by 5 in.; fair Devanāgarī writing of 1777 A.D.; 7–15 lines in a page.

Adhyātmarāmāyaṇa, with *Rāmavarman's* commentary.

Kāṇḍa I. foll. 45; II. foll. 48; III. foll. 36; IV. foll. 45; V. foll. 24; VI. foll. 71; VII. foll. 57. [Sir Charles Wilkins.]

3428.

3157. Foll. 229; size 17 in. by 11 in.; large, modern Devanāgarī writing; European paper; eighteen lines in a page.

Adhyātmarāmāyaṇa, with *Rāmavarman's* commentary.

Kāṇḍa I. ends fol. 42; II., fol. 60; III., fol. 86; IV., fol. 116; V., fol. 135; VI., fol. 191; VII., fol. 229. [H. T. Colebrooke.]

3429.

219 a. Foll. 102; size 15 in. by 5 in.; modern Bengalī handwriting; 6–10 lines in a page.

A commentary (*ṭīkā*) on the *Adhyātmarāmāyaṇa*, by *Gopāla Cakravartin* (?).

It begins:

सच्चिदानन्दसन्दोहमव्यक्तं सदसत्परं ।
सीताभिरामं श्रीरामं भक्तकल्पद्रुमं नुमः ॥
सीतासत्यालिङ्गिताङ्गावन्योन्यपरिवन्दिनौ ।
अन्योन्यमूर्ती सर्वेशौ वन्दे रामेश्वरौ सदा ॥
आयुर्व्यर्थमुपैति नाशमनिशं व्यर्थार्थचिन्तादिभिर्
मृत्युर्गर्जति मस्तकोपरि जराव्यापी गिलत्यन्वहं ।
देहं रामकथामृतैर्यदि पुनः सिक्तं क्षणं स्यादिदं
जन्म स्यात् सफलं ततो मृदुमतेर्यत्नो ममायं सदा ॥

अथ सकलहितावदातचरितानिरन्तरापरोक्षीकृतपरमात्मतत्त्वनिरस्तसमस्तसंशयो ऽपि श्रीरामतत्त्वं लोके प्रकटयितुकामो भगवान् नारदः संदिहान इव कलिकालीनदुरन्तदुरितभवनिरसनोपायं ब्रह्माणं पप्रच्छ ब्रह्मापि श्रीरामकथैवात्र परमोपाय इति । ०

The last page is left unfinished, and the author's name does not occur anywhere in the MS.; the one given above having been supplied by another hand.

The chapters are treated at unequal length, and occasionally one is dismissed altogether as not requiring any explanation.

[H. T. Colebrooke.]

3430.

562. Foll. 130 (counted 128, three leaves being numbered 69); size 12½ in. by 5¾ in.; fair Bengalī handwriting of 1807 A.D.; 9 or 10 lines in a page.

Adhyātmarāmāyaṇavivecana, a brief commentary (*vyākhyā*) on the *Adhyātmarāmāyaṇa*, by *Narottama*.

It begins:

नवदूर्वादलश्यामं रामं नत्वा नरोत्तमः ।
विदधात्यल्पमध्यात्मरामायणविवेचनं ॥

विघ्नध्वंसाय कृतं मङ्गलमादौ शिष्यशिक्षायै निबध्नाति जयतीति ०

Kāṇḍa I. ends fol. 23*a*; II., fol. 48*b*; III., fol. 69*a*; IV., fol. 79*a*; V., fol. 86*a*; VI., fol. 108*a*; VII., fol. 128*b*. It ends:

आनन्दसंप्राविर्तं आनन्दव्याप्तं अत एव पूर्णं सुखेच्छादुःखेच्छारहितं चित्तं येषां ते तथा वैकुण्ठस्य साम्यं यत्र तत्तथा को ब्रह्मा त्वद्भावयुक्ताः त्वद्भक्तियुक्ताः ॥ उत्तरकाण्डे नवमः ॥ ग्रन्थस्य व्याख्या समाप्ता ॥ [H. T. Colebrooke.]

3431.

1427. Foll. 123; size 12¼ in. by 4½ in.; fair Devanāgarī writing of 1803 A.D.; nine lines in a page.

Lalitopākhyāna, a section of the *Brahmāṇḍapurāṇa*, relating the heroic feats of the goddess *Lalitā* against the *Asuras*, especially against *Bhaṇḍāsura*.

It claims to have been revealed by *Vishṇu*, in the form of *Hayagrīva*, to *Agastya*, who had addressed him to ask him questions regarding the origin of the world and the birth of *Mahādevī*. The latter is declared in the 2nd *adhyāya* to have been created first as *Prakṛiti*, afterwards in the form in which she captivated the lord of the universe, *Śiva*, viz. as *Pārvatī*; and in the third place as *Lalitā*, the lovely (*rūpaśālinī*), destined to fight *Bhaṇḍāsura* and to preserve the world from destruction (cf. foll. 18*a* and 25*b*).

It begins: ओं

चतुर्भुजे चंद्रकलावतंसे कुचोन्नते कुंकुमरागशोणे ।
पुंड्रेक्षुपाशांकुशपुष्पबाणहस्ते नमस्ते जगदेकमातः ॥

See Rāj. Mitra, Notices, ii., p. 253.

After conversations on different sins (*brahmahatyā, agamyāgamana,* etc.) and their expiations, the work enters on its main subject with *adhy.* 7 (fol. 19*b*), *bhaṇḍāsuraprādurbhāva;* 8 (fol. 22*b*), *lalitāprādurbhāva;* 9 (fol. 24*a*), *lalitāstavarāja;* 10 (fol. 25*a*), *madanakāmeśvaraprādurbhāva;* 11 (fol. 27*b*), *vaivāhikotsava,* or *Lalitā's* wedding with *Kāmeśvara,* i.e. *Mahādeva;* 12, 13, preparations for the battle; 14 (fol. 32*a*), *śaktisenāvijayayātrā;* 15 (fol. 36*a*), *rathadevatānāṃ prakāśanam;* 16 (fol. 40*a*), *cakrarathadevatāprakāśana;* 17 (fol. 44*a*), *bhaṇḍāsurāhaṃkāra;* 18 (fol. 48*a*), *durmadakuraṇḍavadha;* 19 (fol. 52*a*), *karaṇkādipancasenāpativadha;* 20 (fol. 56*a*), *saptasenāpativadha;* 21 (fol. 60*b*), *vishaṅgapalāyana;* 22 (fol. 65*a*), *bhaṇḍaputravadha;* 23 (fol. 69*b*), *gaṇanāthaparākrama;* 24 (fol. 74*a*), *vishaṅgaviśukravadha;* 25 (fol. 80*a*), *bhaṇḍāsuravadha;* 26 (fol. 85*a*), *madanapunarbhava;* 27 (foll. 90*a* and 92*b*), *mātaṅgakanyānām utpattiḥ* and *tripurāsaptakakshyopākhyāna;* 28 (fol. 97*a*), same subject; 29 (fol. 101*a*), *dikpālādiśivalokāntakathana;* 30 (fol. 105*b*), *mahāpadmāṭavyarghasthāpanakathana;* 31 (fol. 109*b*), *cintāmaṇigṛihāntarakathana;* 32 (fol. 114*a*), *gṛiharājāntarakathana;* 33 (fol. 117*b*), *mantrarājasādhanaprakārakathana;* 34 (fol. 123*a*), *nyāsavidhi.*

End and colophon as in the 'Notices.'

[H. T. COLEBROOKE.]

3432.

916d. Foll. 86 (counted 84, nos. 53 and 54 being double); size 12¾ in. by 5 in.; fairly good, modern Devanāgarī writing; 9–12 lines in a page.

Lalitopākhyāna. Rather incorrect.

[H. T. COLEBROOKE.]

3433.

2712. Foll. 35; size 7 in. by 4½ in.; legibly written in Devanāgarī, by three different, modern hands; 10–14 lines in a page.

Hanumadākhyāna, in 13 *adhyāyas;* giving a description and legendary account of the sacred spots in the neighbourhood of Añjanādri (Hanumad Malei in Mysore, acc. to Wilson), in the form of a dialogue between *Brahman* and *Nārada;* and professing to form part of the *Brahmāṇḍapurāṇa.*

The title *Añjanādrimāhātmya,* inscribed in English characters at the beginning and end of the MS., does not occur in the colophons of the chapters.

The first few leaves are particularly incorrect and carelessly written. It begins (somewhat corrected): श्रीनारदः ।

कलौ कलुषचित्तानां पापानां(?) च दुरात्मनां ।
कर्मणा(*r.* कर्मणां) काम्यमानानां का गतिः कमलो-
द्भव ॥ १ ॥
पंचाशत्कोटिविस्तीर्णभूमौ संति ह्यनेकशः ।
अत्र वंसकृतनैव(*r.* वास°) मोक्षं विंदंति मानवाः ॥ २ ॥
ऐहिकामुष्मिकानीति(यैहो°नींती MS.) फलानि
[विविधानि च ।
यत्र सिध्यंति सर्वेषां जनानां वसतां सदा ॥ ३ ॥
क्षेत्राणामुत्तमं क्षेत्रं तीर्थानामुत्तमं तथा ।
स्थानानामुत्तमं वग्धि तत्क्षेत्रं च वदस्व नः ॥ ४ ॥
एतद्विचार्यं मे ब्रह्मन् श्रोतुं कौतूहलं हि नः ।
ब्रह्मा ॥ [. . . . .]
शृणु नारद वक्ष्यामि पुण्यमद्रिमनुत्तमं(पमाद्य) ॥ ६ ॥
त[त्क]थामंजनाद्रेस्तु पवित्रं(°त्रां) पापनाशनं(°नां) ।
यस्य(? यस्याः) श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ ७ ॥

Hanumat is connected with the Añjanādri, on account of his metronymic *Āñjaneya* (fol. 13*b*), as being the son of (*Kesarin,* fol. 26*a,* and) *Añjanā* (fol. 16*b*). The locality is described as follows (fol. 46, slightly corrected):

विंध्यस्य दक्षिणे भागे सर्वौषधिसमन्वितः ।
अंजनाद्रिरिति ख्यातः यत्र कुमो(?) हि भाषते ॥

ककुद्गिरेः पूर्वभागे सार्धयोजनषट्कके ।
पिनाकिन्याः पूर्वभागे पूर्वाद्रिर्यत्र संस्थितः ॥
नंद्याख्यपर्वतस्यैव तथा चाग्नेयभागके ।
पयस्विन्याः पूर्वभागे तथा हि क्रोशयुक्तके ॥
क्रोशत्रितयमात्रेण सिंहाद्रिर्यत्र संस्थितः ।
मुचेकुंदो(r. मुचु°) महाराजो यत्र तिष्ठति मानदः ॥
तत्क्षेत्रं तु महापुण्यं तथा वै शतशृंगकं ।
मध्यगंगाशना(? °समा)युक्तं साक्षाद्गंगासमं जलं ।
गंगातीर्थमिति ख्यातं कथितं हि जगत्त्रये ॥
पूर्वस्यां शतशृंगस्य पर्वतस्य दिशि स्थितः ।
हेमाद्रिरिति संस्थो(?) वै सार्धयोजनमात्रके ॥
एतन्मध्ये महापुण्या वदी चैव पशुति(!) ।
तत्समीपे ह्यंजनाद्रिर्दृश्यते हि त्रिक्रोशके ॥
अथ नासिन्या महानद्याः दक्षिणे देशमात्रके ।
पंचयोजनमात्रं तु क्षांडोनार्दिः(!) प्रदृश्यते ॥
कौंडिण्याख्यमुनेश्चैव(!) आश्रमो यत्र संस्थितः ।
कौंडिण्याद्रिरिति प्रोक्तः कौंडिण्याख्या(!) महानदी ॥
तस्यास्तु दक्षिणे कच्छे क्रोशत्रिततयुक्तके ।
पूर्वाद्री[ति] नाम संस्थो महापुण्यप्रदायकः ॥

Kāñcīpurī and Śrīraṅga are likewise included in the sacred district described.

It ends :

कौंडिण्यनद्यास्तु महामलौघ-
निवारणायास्तु कथां सुसादरं ।
स्नानं महादेवमुतस्वदर्शनं
त्रयं हि लोके ऽतिसुदुस्तरं महत् ॥
इति श्रीब्रह्मांडपुराणे हनुमदाख्याने त्रयोदशो ऽध्यायः ॥

[MACKENZIE COLLECTION.]

3434.

2711. Foll. 24; size 9 in. by 4¾ in.; good Devanāgarī writing of 1782 (?) A.D.; thirteen lines in a page.

Pinākinī-māhātmya, in 12 *adhyāyas*, assigned to the *Brahmāṇḍapurāṇa*, and containing legends connected with the country watered by the river Pinākinī (Pennar), which takes its origin on the summit of the Valayādri or Nandi-parvata (fol. 11*b*), where *Śaṅkara Śiva* slew the *daitya Dhūmāsura* or *Dhūmravarṇa* (fol. 19*a*) with his bow (*pināka*).

Excepting occasional slips regarding final *visarga*, the MS. is pretty correct. It begins :

वंदे वंद्येशमानंदज्ञानदेहं रमापतिं ।
ऋषीणां मनसा ध्येयं सर्वतीर्थनिवासिनं ॥
निमिर्नाम महाराजो गोदावर्यास्तटे शुभे ।
पप्रच्छ मुनिशार्दूलं वशिष्ठं ब्रह्मनंदनं ।
यज्ञार्थं समुपायांतं विशेषज्ञं महामनाः ॥

राजोवाच ॥

वशिष्ठ वैष्णवश्रेष्ठ प्रसीद मुनिपुंगव ।
सर्वशास्त्रेषु सर्वज्ञ नमस्ते ब्रह्मनंदन ॥
नदीनां तारतम्यं त्वं(? तु) कथं माहात्म्यमुत्तमं ।
वद मे कृपया तात विस्तराच्छ्रव्यभावतः ॥

वशिष्ठः ॥

शृणु राजन्महाभाग नदीनामंतरं तव ।
वक्ष्यामि विस्तरेणैव समाहितमना भव ॥
हरिपादाब्जसंभूता गंगा सर्वार्थदायिनी ।
सा श्रेष्ठा हि नदीनां वै ततो गोदावरी वरा ॥
वरं गोदावरीतीरे नीरेणोदरपूरणं ।
अन्यत्र शर्करायुक्तं पायसं तु परित्यजेत् ॥
गोदावरी च गंगायाः पंचाशद्गुणनीचगा ।
कृष्णवेणी ततो नीचा सहस्रगुणतो नृप ॥
सरस्वती ततो नीचा कृष्णवेण्या दशाधमा ।
तत्समा स्याच्च कावेरी सरयूर्द्विगुणाधमा ॥
कलिंदस्य कुमारी तु एतासां त्रिगुणाधमा ।
कलिंदकन्यकायास्तु नर्मदा त्रिगुणाधमा ।
तुंगभद्रा तथा राजन् कावेर्यास्त्रिगुणाधमा ॥
एतत्समो महाभाग सिंधुश्च भवनाशनी ।
सर्वाधिक्यं वराल्लेभे नरसिंहान्महात्मनः ॥
कुमुद्वती नृपश्रेष्ठ नरसिंहसुताधमा ।
वेत्रवाभीमरथ्यौ च ताम्रपर्णी मलापहा ॥
नरसिंहसुतायास्तु क्रमेण द्विगुणाधमा ।
पिनाकिनी महापुण्या भीमरथ्याः समा मता ॥
पृथक् सागरगामिन्यस्सर्वाश्च नृपपुंगव ।
समा ज्ञेया महाभाग नात्र कार्या विचारणा ॥

पुष्करिण्यश्च नद्यश्च एतासां द्विगुणाधमाः ।
स्वामिपुष्करिणी नाम चंद्रपुष्करिणी तथा ॥
मानसी च तथा राजन् कृष्णवेण्याः समा मताः ।
अन्यानि देवखातानि पुष्करिण्यश्च मानव ॥
अवराणि हि चंद्राया गुणैश्च शतशस्तु वै ।
याश्चान्याः सरितो राजन् देवखाताद्दशाधमाः ॥
सरितो नृपतिश्रेष्ठ तटाको द्विगुणाधमः ।
वाप्यश्चैवं महाराजन् तटाका[द्] द्विगुणाधमाः ॥
तारतम्यं नृपश्रेष्ठ नद्यादीनां मया तव ।
सर्वमुक्तं शास्त्रसिद्धं किमन्यच्छ्रोतुमिच्छसि ॥

सूत उवाच ॥

इत्युक्तो गुरुणा राजा गंगामाहात्म्यमुत्तमं ।
गोदावर्याश्च माहात्म्यं कृष्णवेण्यास्तथैव च ।
पिनाकिन्याश्च माहात्म्यं पप्रच्छ मुनिपुंगवं ॥

ऋषय ऊचुः ॥

निमिराजेन वै पृष्टो माहात्म्यं ब्रह्मनंदन ।
किमुवाच मुनिश्रेष्ठ[स्] तदस्माकं तु त्वं(!) वद ॥
पिनाकिन्यास्तदे सूतो ऋश्यशृंगाश्रमे शुभे ।
एवं पृष्टो मुनिश्रेष्ठैरुवाच परमं वचः ॥

सूतः ॥ शृणुध्वं मुनयः सर्वे धरणीमंडले स्थिताः ।
वशिष्ठनिमिसंवादं सर्वमंगलदायकं ॥

वशिष्ठः ॥ पुरा कश्चिद् दुराचारो निर्गैलो नाम नामतः ।
वेश्यासक्तस्तथा राजन् सर्वधर्मबहिष्कृतः ॥
निष्ठुरः सर्वलोकानां दयादाक्षिण्यवर्जितः ।
पित्रार्जितं धनं नीतं वेश्यासंगेन मानद ॥
ततश्चौर्यपरो ऽभूत्स तत्रालाभे कृषिं चरन् ।
तत्रापि ह्रासमापन्नो मृगहत्यां चकार ह ॥
एवं दिनानि नीतानि दुराचारेण सत्तम ।
तदा सर्वे मृगा राजन् व्याधेन निधनं गताः ॥
क्षुत्तृड्भ्यां बाधितो भूत्वा वृक्षमूलमुपाययौ ।
तदा कार्पटिको विप्र आगतो दैवचोदितः ॥
तं दृष्ट्वा निर्गैलो दुष्टः किंचिदाश्वस्तमानसः ।
पृष्टवानुदकं किंचिन्न ददौ विप्रसत्तमः ॥
मातापित्रोश्च दातव्यं तोयं तव न निर्गैल ।
एवमुक्त्वा द्विजश्रेष्ठो वृक्षमूलमुपाययौ ॥
मास्तु तर्हि महाप्राज्ञ तांबूलं देहि सत्तम ।
तृषया बाधितो ऽस्यद्य रक्ष मां कृपया भवन् ॥
तांबूलं भक्षयित्वाहं तृड्बाधां वारयाम्यहं ।
एतच्छ्रुत्वा दयालुः स तांबूलं दत्तवानृप ॥
तीक्ष्णगंता ययौ विप्रश्चूर्णैस्यार्द्रत्वकांक्षया ।
विक्षिप्य च स तास्तस्मिंश्चूर्णे(!) कार्पटिको मुनिः ॥
तांबूलं भक्षयित्वाथ निर्गैलो मुनिसत्तमाः ।
ममार वृक्षमूले स क्षुत्तृड्भ्यां बाधितस्तदा ॥
समाजग्मुर्यमभटा बबंधुः पाशकैरमुं ।
नित्युस्ते यमलोकाय दुष्टमार्गेण निर्गैलं ॥
तस्मिन्काले हरेर्दूताः समाजग्मुर्महौजसः ।
तान्दृष्ट्वा यमदूतास्ते दुद्रुवुर्भयतो द्रुतं ॥
पाशांश्छित्त्वा तदा तेषां तमादाय महौजसः ।
गच्छमाना विष्णुलोकं याम्यास्तानिदमब्रुवन् ॥

यमदूता ऊचुः ॥

शृणुध्वं हरिदूता भो पापिष्ठो ऽयं निरंतरं ।
नेतुं नार्हेति युष्माभिस्त्यजध्वं पिशिताशनं ॥
श्रुत्वा तेषां च वाक्यानि हरिदूतास्तदाब्रुवन् ।
अहो कष्टमहो कष्टमधर्मः शंसते(?शस्यते) सतां ।
पापो दृष्टो भवद्भिर्वै नैव पुण्यं कृतं तथा ॥
आजन्मकृतपापानां प्रायश्चित्तमनेन वै ।
गंगोदकयुतं चूर्णं दत्तं कार्पटिकेन वै ॥
कृतं तदेव धर्मं हि त्यजध्वं निर्गैलं शुभं ।
महापातकयुक्तो ऽपि गंगातोयस्य दर्शनात् ।
मुच्यते नात्र संदेहो किं तत्र पाशनेन वै ॥
श्रुत्वा तेषां च वाक्यानि यमदूतास्तथैव च ।
विहाय निर्गैलं ते तु यमलोकं समाययुः ॥
हरिदूतास्तदा ते तु स्वर्गे स्थाप्य हरिं गताः ।
तस्मात्सर्वप्रयत्नेन गंगास्नानं समाचरेत् ॥
स्मर्तव्या सततं गंगा द्रष्टव्या च निरंतरं ।
पानीया च तथा नित्यं स्नातव्या मुनिपुंगवाः ॥
एवमुक्त्वाथ सूतो ऽपि गोदावर्यास्तदाब्रवीत् ।
माहात्म्यं सर्वपापघ्नं सर्वरोगविनाशनं ॥

इति श्रीब्रह्मांडपुराणे निमिवशिष्ठसंवादे पिनाकिनीमाहात्म्ये प्रथमो ऽध्यायः ॥

The story of the Pinākinī commences in the middle of the next chapter (fol. 3*a*).

It ends :

शृणुध्वं मुनयः सर्वे माहात्म्यं मंगलप्रदं ।
कर्तव्या तीर्थयात्रा वै स्मर्तव्यो विष्णुरेव हि ॥

कर्तव्यं सततं कर्म विस्मर्तव्यं विकर्म वै ।
ध्येयो नारायणो देवो सेव्यो वै गुरुरादरात् ॥
ज्ञानादिसाधनं तीर्थं ज्ञानं वै मोक्षसाधनं ।
तस्माद्यूयं पिनाकिन्यां कुरुध्वं स्नानमंजसा ॥
एवमुक्त्वा ऋषीन्सूत ऋषि(ऋष्य)शृंगादिकान्द्विजान् ।
पिनाकिन्यां कृतस्नानो गंगातीरं ययौ मुनिः ॥
ऋषि(ऋष्य)शृंगादयस्तस्यां स्नानं कृत्वा यथाविधि ।
ततो वै शुद्धचित्तास्ते सिद्धिमापुः परां शुभां ॥
इति श्रीब्रह्मांडपुराणे पिनाकिनीमाहात्म्ये द्वादशो ऽध्यायः ॥
शुभकृद्वत्सरे मासि मार्गशीर्षे भृगोर्दिने ।
शिते पक्षे दशम्यां तु पिनाकिन्या नदीतटे ॥
कोनेरिनाम्ना लिखितं पुस्तकं परिपाल्यतां ।
बुद्धियुक्तैः प्रयत्नेन कष्टेन लिखितं शुभं ॥

[MACKENZIE COLLECTION.]

3435.

2678 c. Foll. 23; size 4to, $8\frac{3}{4}$ in. by $6\frac{1}{4}$ in.; rough country paper; modern Telugu handwriting; 22–25 lines in a page.

Pinākinīmāhātmya.

It begins: वंदे देवेशमानंदज्ञानदेहं रमापतिं । °

Colophon: इति श्रीब्रह्मांडपुराणे पिनाकिनीमाहात्म्ये निमिवसिष्ठसंवादे द्वादशो ऽध्यायः ॥

[MACKENZIE COLLECTION.]

3436.

2574 a. Foll. 11; size folio, 13 in. by $8\frac{1}{2}$ in.; rough country paper; modern Telugu handwriting; 36–42 lines in a page.

Pinākinīmāhātmya. Beginning as in last MS.

Colophon: इति श्रीब्रह्मांडपुराणे पिनाकिनीमाहात्म्ये तीर्थखंडे द्वादशो ऽध्यायः समाप्तः ॥

[MACKENZIE COLLECTION.]

3437.

2574 c. Foll. 17; size folio, 13 in. by $8\frac{1}{2}$ in.; modern Telugu handwriting; 26–33 lines in a page.

Śrīraṅgamāhātmya, in ten *adhyāyas,* containing a legendary account of the celebrated temple at Śrīraṅga (near Trichinopoly) on the Kāverī; and professing to form part of the *Brahmāṇḍapurāṇa.* It begins: श्रीनारदः ॥

देवदेव विरूपाक्ष श्रुतं सर्वं मयाधुना ।
त्रैलोक्यांतर्गतं वृत्तं त्वन्मुखांभोजनिःसृतं ॥
तथा पुण्यानि तीर्थानि पुण्यान्यायतनानि च ।
गंगाद्याः सरितः सर्वाः सेतिहासाश्च शंकर ॥
कावेर्यास्तु प्रसंगेन तस्यास्तीरे स्वयं पुरा ।
प्रस्तुतं रंगमित्युक्तं विष्णोरायतनं महत् ॥
तस्याहं श्रोतुमिच्छामि विस्तरेण महेश्वर ।
माहात्म्यमघनाशाय पुण्यस्य च विवृद्धये ॥
एतद्धि श्रुतमं लोके स्वकाले ऽपि मया तव ।
न प्रकाशितमेवाद्य मया सम्यक् प्रकाश्यते ॥
माहात्म्यं विस्तरेणापि वक्तुं वर्षशतैरपि ।
न शक्यते श्रोतुमपि तस्मात्संक्षेपतः शृणु ॥

It ends:

नास्तिकाय न वक्तव्यं नाभागवतसंनिधौ ।
सह शुश्रूषवे(?° षुणा) वाच्यं न च मां यो ऽभ्यसूयति ॥
श्रुत्वैतदखिलं ब्रह्मन् विष्णुभक्तो ऽपि वत्सरः(° लः) ।
जित्वा क्रोधं च कामं च विष्णुमाप्नोति शाश्वतं ॥
पठन् शृण्वं लिखन् बृहत् रंगमाहात्म्यमुत्तमं ।
मुक्ताशुभं शुभं याति तद्विष्णोः परमं पदं ॥

इति श्रीब्रह्मांडपुराणे महेश्वरनारदसंवादे श्रीरंगमाहात्म्ये तीर्थवैभवं नाम दशमो ऽध्यायः ॥

[MACKENZIE COLLECTION.]

3438.

2615 a. Foll. 18; size 4to, $11\frac{3}{4}$ in. by $8\frac{3}{4}$ in.; modern, cursive Telugu handwriting; 18–28 lines in a page.

Rāmāyaṇamāhātmya, a section of the *Brahmāṇḍapurāṇa* (*adhyāyas* 147–155).

Cf. Wilson, Mackenzie Collection, 2nd ed., p. 124. It begins:

एतत्ते राममाहात्म्यं मयोक्तं सुतले शुभं ।
IV. (foll. 19): मैत्रेय उवाच। मनोः शतरूपायां कन्या ३ आकृतिः देवहूतिः प्रसूतिः। आकृतिं रुचये ददौ ०

Col. only *skandha* and *adhyāya* (as in I.) without special title.

V. (foll. 17): राजोवाच। कथमात्मारामस्य प्रियव्रतस्य गृहे रतिः। ० Col. without special title.

VI. (foll. 14): राजोवाच। निवृत्तिमार्गः कथितः। तथा स्वायंभुवो मन्वंतरः० Col. without special title.

VII. (foll. 8, marked चि० ७ in margin): राजोवाच। नारायणः सर्वभूतेषु समः। इंद्रस्यार्थे कथं दैत्यानवधीत्। ० Col. without special title.

VIII. (foll. 9, marked चि० ८): राजोवाच। स्वायंभुवस्य मनोर्वंशः श्रुतः किंत्वन्यान्मनून्वद। ० Col. without special title.

IX. (foll. 15, marked चि० ९): राजोवाच। मन्वंतराणि श्रुतानि तेषु हरेर्वीर्याणि च। ० Col. without special title.

X.*b* (foll. 22, marked भा० टी० १०): शुक उवाच। कंसभार्यौ अस्तिः प्राप्तिः। जरासंधाय पित्रे सर्वमुवाच(!)। ० Col. without special title.

X.*a* (foll. 20, marked चि० १०; once चि० टि०): राजोवाच। भवता सोममूर्ययोर्वंशः कथितः तेषां चरितं च। किंतु यदुवंशे अवतीर्ये नारायणः किं कृतवान् वद ०

Col.: इति श्रीमद्भा० म० शतसाहस्र्यां संहितायां चित्सुखीटीकायां दशमस्कंधे एकोनपंचाशत्तमो ऽध्यायः ॥

XI. (foll. 16, marked, 1–3 चि० ११; 4–16 भा० टी० ११): अथैकादशस्कंधे कथासंग्रहः ॥ शुक उ०। कृष्णः सरामो दैत्यवधं कृत्वा दुर्योधनादिभिः कोपितान्पांडवान्मित्रीकृत्य अन्योन्यतः नृपान्हत्वा भूभारं संहृत्य इदमचिंतयत् ०

Col.: श्रीमद्भा० म० श० सं० चित्सुखीटीकायां एकादशस्कंधे एकत्रिंशो ऽध्यायः। एवमेकादशस्कंधकथासंग्रहः समाप्तः॥

XII. (foll. 9, marked भा० टी० १२): शुक उवाच। भविष्यं शृणु। नवमस्कंधे उक्तं बृहद्रथपुत्रो जरासंधः तस्य माजारिः तस्य रिपुंजयो भविष्यति। ०

It ends with the three verses *Bhāg. P.* XII. 13, 1. यं ब्रह्मा०; 20. नमस्तस्मै भगवते०; 21. योगींद्राय नमस्तस्मै०॥ ३ ॥ श्रीद्वादशस्कंधकथासंग्रहः समाप्तिमफाणीत्। संवत् १८५७ ०॥

For another *Bhāgavatakathāsaṃgraha*, see no. 3539.

[H. T. Colebrooke.]

3519.

1185a. Foll. 66, the first of which is wanting; size 13 in. by $4\frac{3}{4}$ in.; modern Bengalī writing; 8 or 9 lines in a page.

Bhāgavataṭīkā, or *Bhāgavata-*(*gūḍhārtha-*)*rahasya*, exegetical notes on the *Bhāgavata-purāṇa*—only *skandhas* 1–7 of which are, however, dealt with in this MS.—by *Bhāgavatānanda Gosvāmin*.

The colophon of the different *skandhas* takes the form of the following verse:

रघुनाथकृपादृष्ट्या मया चाप्यल्पबुद्धिना ।
[प्रथम]स्कंदगूढार्थरहस्यं सुनिरूपितं ॥

In the margin of fol. 2 Colebrooke's Paṇḍit has supplied the title, in Devanāgarī: भागवतानंदगोस्वामिकृतश्रीभागवतटीका० पु० पत्र ६३ श्लोक १७७५ ॥ which shows that the last three leaves, written in a different hand from the rest, were added at a later period. At the end, again, these additional leaves are marked thus by the Paṇḍit: भागवतगोस्वामिकृतभागवतटीका। शेषपुत्र ३ श्लोक० ६०

Properly speaking, the work is not a commentary on the *Bhāgavatapurāṇa*, but a summary of its dogmatical teaching as viewed by the commentator, and set forth in the order of the original text.

It ends: अहमिति आत्मवृत्तान्तेन भक्तिप्रज्ञाया निगुणत्वेन नित्यत्वं प्रतिपादितं ॥

रघुनाथकृपा सप्तम° as above ॥

वालिशो ऽहं महाम्भोधौ निमग्नो रत्नमुद्धरन् ।
रघुनाथ कृपापाङ्गैरवलोकय सस्मितं ॥

इति सप्तमस्कन्दरहस्यं समाप्तं ॥ अथाष्टमस्कन्दरहस्यं ॥ हत इति तमन्वये वर्तमा- end of fol. 66*a*.

[H. T. Colebrooke.]

3520, 3521.

2348, 2349. Foll. 411 (foll. 212 & 213 of which are wanting); size 10½ in. by 4¾ in.; clear Devanāgarī writing of about 1550 A.D.; 10–12 lines in a page.

Bhāgavatapurāṇa (*skandha* x.), with short glosses, interwoven with the text, and marked द° टी° (*daśamaskandhaṭīkā*) in the margin. Incomplete.

It begins:

वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥ १ ॥

विश्वमर्गविसर्गादिनवलक्षणलक्षितं ।
श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् ॥ २ ॥

यत्पादाब्जमुगंधपुष्पतुलसीलोभाद्भ्रमंतो ऽप्यहो
योगिप्राप्यैर्गतिं प्रयांति मधुपा यद्भक्तिहीना अपि ।
ब्रह्मेशाः पवनाशिनो ऽपि मुनयः संसारचक्रे भृशं
भ्राम्यंते एव(?ऽत्र) गतागतैर्मुहुरहो तस्मै नमो विष्णवे
दशमे दशमं लक्षमाश्रिताश्रयविग्रहं । [॥ ३ ॥
क्रीडद्यदुकुलांभोधौ परमानंदमुदीर्यते (!) ॥ ४ ॥

दशमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते ।
धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभुजां ॥ ५ ॥

प्राकृतादिचतुर्धा यो निरोधः स तु वर्णितः ।
तत्तत्प्रसंगतः सृष्टिसंहारादिनिरूपणैः ॥ ६ ॥

कृता नवतिरध्याया दशमे कृष्णकीर्तये ।
आद्यैश्चतुर्भिरध्यायैर्ब्रह्मप्रार्थनयावनेः ॥ ७ ॥

भारं हर्तुं हरेर्जन्म सप्तमं निरूप्यते ।
गोकुले मथुरायां च द्वारकायां ततः क्रमात् ॥ ८ ॥

कृष्णलीला त्रिधा प्रोक्ता तत्तद्भेदैस्त्वनेकधा ।
सपंचत्रिंशताध्यायैर्बृहद्वृंदावनादिषु ॥ ९ ॥

गोकुले वसतो लीला वर्ण्यते सुरदुष्करा ।
एकेन यमुनावारिण्यक्रूरेण कृता स्तुतिः ।
एकादशभिराख्याता लीला मधुपुरे कृता ॥ १० ॥

शेषैर्द्वारवतीलीला तन्निर्माणादि वर्ण्यते ।
एवं नवतिरध्याया दशमे विंशदाधिकाः ॥ ११ ॥

तत्र तु प्रथमे कंसः स्वमृत्युं देवकीसुतात् ।
श्रुत्वा भीतो ऽवधीत्तस्याः षड्गर्भानिति वर्ण्यते ॥ १२ ॥

कृष्णावतारचरितश्रवणामृतनिर्वृतः ।
उक्तानुवादनौत्सुक्याद्राजा पृच्छति तत्पुनः ॥
राजोवाच ॥ कथितो वंशविस्तरो °

Vol. ii. begins with the comment on *adhy.* 33, v. 7; and breaks off with *adhy.* 73, v. 16. Cf. Burnouf, préf., p. clxv. [Gaikawar.]

3522, 3523.

387, 388. Foll. 497 (1–249, 250–497); size 16 in. by 6¾ in.; good, modern Bengalī handwriting; twelve lines in a page.

Vaishṇava-toshaṇī, a commentary on the 10th *skandha* of the *Bhāgavatapurāṇa*, by *Sanātana Gosvāmin*.

It begins: श्रीश्रीराधाकृष्णाय नमः ॥

श्रीमन्मदनगोपालं वृन्दारण्यपुरंदरं ।
श्रीगोविन्दं प्रपद्येऽहं दीनानुग्रहकातरं (°कारकं R.M.)॥

वन्दे श्रीकृष्णचैतन्यं भगवन्तं कृपार्णवं ।
प्रेमभक्तिवितानार्थं गौडेष्ववततार यः ॥

श्रीमाधवपुरीं वन्दे यतीन्द्रं शिष्यसंयुतं ।
लोकेष्वदुरितो येन कृष्णभक्त्यमराद्रिपः ॥

श्रीभागवतनिध्याम्नै टीकादृष्टिरदायि यैः ।
श्रीधरस्वामिपादांस्तान् वन्दे भक्त्येकरक्षकान् ॥

भट्टाचार्यं सार्वभौमं विद्यावाचस्पतीन् गुरून् ।
वन्दे विद्याभूषणं च गौडदेशविभूषणं ॥

वन्दे श्रीपरमानन्दं भट्टाचार्यशिरोमणिं ।
रामभट्टं तथा वाणीविलासं चोपदेशकं ॥

नमामि श्रीमदद्वैताचार्यं श्रीवासपण्डितं ।
नित्यानन्दावधूतं च श्रीमच्चैतन्यवल्लभं ॥

दामोदरस्वरूपादीन् वन्दे चैतन्यपार्षदान् ।
येषां पादरजःस्पर्शादधमो ऽप्युत्तमो भवेत् ॥

वृन्दावनप्रियान् वन्दे श्रीगोविन्दपदाश्रितान् ।
श्रीमत्काशीश्वरं लोकनाथं श्रीकृष्णदासकं ॥

श्रीधरस्वामिपादैर्या व्यंजिता न क्वचित् क्वचित् ।
सेयं श्रीदशमस्कन्धटीका वैष्णवतोषणी ॥

वैष्णवपरितोषः स्याद्यत्र यत्र ततस्ततः ।
लेख्यं वैष्णवसिद्धान्तानुसारेणैव किंचन ॥

येषां प्रोत्साहनेनास्मि प्रवृत्तो ऽत्यन्तसाहसे ।
ते दीनानुग्रहव्यग्राः शरणं मे ऽत्र वैष्णवाः ॥

राधाप्रियप्रेमविशेषपुष्टौ
गोपालभट्टो रघुनाथदासः ।
स्यातामुभौ यत्र सकृत्सहायौ
को नाम सो ऽर्थो न भवेत्सुसिद्धः ॥

श्रीमच्चैतन्यरूपस्य प्रीत्यै गुणवतो ऽखिलं ।
भूयादिदं यदादेशबलेनैव विलिख्यते ॥

श्रीचैतन्यपदाम्भोजगन्धज्ञैरेव वैष्णवैः ।
एषा रसयितुं शक्या टीका वैष्णवतोषणी ॥

Vol. ii. begins shortly before the end of the 39th *adhyāya*.

For another MS. of this work see Rāj. Mitra, Notices, vi., p. 190. The epilogue of that MS. — composed by *Sanātana's* nephew *Jīva Gosvāmin*, and giving an account of the author, and the associates of *Caitanya*, and expressly mentioning this work amongst those composed by *Sanātana* — is not contained in the present MS., which seems to have been copied from one the last leaf of which had been lost, seeing that the last three verses are not commented upon. In the present MS., moreover, the author's name does not occur in any of the colophons of chapters.

According to the Cat. Catt., the work is referred to (? under the title *Vishṇutoshiṇī*) in the *Bhāgavatakramasandarbha* (no. 3530).

It ends: तथा चोक्तं । एतन्निर्विद्यमानानात्यादि ॥ श्रीभागवतदशमस्कन्धस्य टिप्पणी संपूर्णा ॥ श्लोकसंख्या पूर्वदृष्ट्वे २५५०० ॥ [H. T. Colebrooke.]

3524.

877. Foll. 88; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; good Devanāgarī writing of 1582 A.D.; eleven lines in a page.

Fragment of the *Subodhinī*, a commentary on the 10th *skandha* of the *Bhāgavatapurāṇa*, by *Vallabha Dīkshita*, son of *Lakshmaṇa Bhaṭṭa*, and founder of the *Vaishṇava* sect named after him.

This fragment forms a complete whole in itself in so far as it extends over those five *adhyāyas* of the 10th *skandha* generally known as the *Rāsapañcādhyāyī*, and descriptive of *Kṛishṇa's* sports with the *Gopīs*; viz. *adhys.* 29–33 of our editions, here, however, counted 26–30.

It begins:

ब्रह्मानंदात्समुद्धृत्य भजनानंदयोजने ।
लीलया युज्यते सम्यक् सा तुर्ये विनिरूप्यते ॥

लौकिकस्त्रीषु संसिद्धा तद्द्वारा पुरुषे भवेत् ।
स्वानंदानुभवार्थं हि योग्यतापि निरूपिता ॥

ततो हि भजनानंदः स्त्रीषु सम्यग्विधार्यते ।
तद्द्वारा पुरुषाणां च भविष्यति न चान्यथा ॥ ० [९] ॥

It ends:

विक्रीडितमिति । ० अचिरेणैव धीरो ऽपि भवति । अतः इदं साभिप्रायेण श्रोतव्यमिति फलप्रकरणत्वात् फलमुक्तं ॥ ४० ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कंधविवरणे त्रिंशत्तमाध्यायविवरणं ॥

संवत् १६३९ वर्षे कार्त्तिकशुदि ६ रवौ अद्य श्रीद्वीपमंदिरवास्तव्यं सारस्वतज्ञातीय जोशी (Marāṭhī for *jyotirvid*) देवराजसुतजिता लपितं(लिखितं) पुस्तकं वैष्णवजीवाकेन पठनार्थं लेखकपाठकयोः शुभं भवतु ॥

This MS. is referred to by Burnouf (préf., p. clxvi.) under its old number 1152.

[H. T. Colebrooke.]

3525.

1309. Foll. 180 (besides three leaves inserted after foll. 71 & 78 to supply defects); size 12¾ in. by 4½ in.; fair, modern Bengalī handwriting; seven lines in a page.

Prakāśa, a commentary on the 11th *skandha* of the *Bhāgavatapurāṇa*.

The author's name is not given; but a commentary of the same title was composed by *Śrīnivāsa* (for *sk.* III. and X. see Burnell, Tanjore Cat., p. 104*b*).

It begins:

वन्दे वृन्दावनानन्दस्वभावक्रीडनोत्सुकं ।
गोविन्दं गोपरामाणां रमणं नित्यविग्रहं ॥

मतामनुग्रहाय भजनौपयिकीं भगवत्कृतामचिन्त्यमाधुरीं लीलामनुवर्त्य पृथ्वीभवे रूपाणाममतां वधरूपां भगवता साक्षात्परम्परया कृतां लीलां चानुवर्त्यपरमनिःश्रेयससाधनभजनादिविधिं निरूपयितुं तदङ्गवैराग्याय मौषलप्रसंगं वक्तुं स्वावतारप्रयोजनदैत्यवधमुपसंहरन्नाह कृत्वेति ।

The comment on the last verse, and the colophon run thus:

अन्यत्र ग्रन्थान्तरे इह चास्मिन् ग्रन्थे परमहंसगतौ परमहंसप्राप्ये श्रीकृष्णे ॥ इत्येकादशे एकविंशाध्यायप्रकाशः ॥

Burnouf (préf., p. clxvi.) refers to this MS. under its old number 1283. His suggestion that this commentary may belong to *Viśvanātha's Sārārthadarśinī* seems unfounded.

[H. T. Colebrooke.]

3526.

806a. Foll. 17; size 15¼ in. by 5 in.; modern Bengalī handwriting; nine lines in a page.

Tattvasandarbha, the 1st section (*sandarbha*) of *Jīva Gosvāmin's Bhāgavatasandarbha*, in the 7 sections of which — viz.: *Tattvasandarbha*, *Bhagavatsandarbha*, *Paramārthasandarbha*, *Kṛishṇasandarbha*, *Bhaktisandarbha*, *Prītisandarbha*, and *Kramasandarbha* — the author expounds the doctrines of the *Bhāgavatapurāṇa* in their various aspects, in accordance with the teachings of *Rūpa* and *Sanātana*, and in the order of the original text.

Regarding *Jīva's* authorship see next MS., and H. H. Wilson, Sel. Works, i., p. 167.

It begins: श्रीश्रीरामाय नमः ॥

श्रीकृष्णकृष्णचैतन्य[श्री]सनातनरूपक ।
गोपालरघुनाथाम्र व्रजवल्लभ पाहि मां ॥
तौ संतोषयता सन्तौ ०

The first part of the MS. (foll. 1–12) agrees almost word for word with that of the *Kṛishṇasandarbha* (no. 3528), to which section this portion has probably to be referred. For a different beginning see Rāj. Mitra, Notices, iv., p. 247. After that it takes a different turn, and (like the MS. referred to) comes to an end rather abruptly on fol. 17*b*:

विरमे[ते]ति (*Bh. P.*, XII. 7, 21) । वृत्तित्रयं जाग्रत्स्वप्नसुषुप्तिरूपं । आत्मानं परमात्मानं स्वयं वामदेवादेरिव मायामयत्वानुसंधानेन देवहूत्यादेरिवानुष्ठितेन योगेन वा ततश्च ईहायाः तदनुशीलनव्यतिरिक्तचेष्टायाः ॥ १२ । ७ ॥ श्रीसूतः(? *r.* श्रीसूतोहिष्ट०) ॥ उद्दिष्टसंबन्धः ॥ इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीकृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसंदर्भे तत्त्वसंदर्भो नाम प्रथमः संदर्भः ॥ अत्र श्लोकसंख्या ४७५ (577 Rāj. M.) ॥ समाप्तश्चायं ग्रन्थः ॥

[H. T. Colebrooke.]

3527.

462b. Foll. 26; size 16¼ in. by 5¼ in.; fair, modern Bengalī handwriting (the same as in last MS.); nine lines in a page.

Paramātmasandarbha, the 3rd section of *Jīva Gosvāmin's Bhāgavatasandarbha*, treating of the divine spirit.

In the margin of the leaves the treatise is (apparently erroneously) called *Paramārthasandarbha* (cf. Cat. Catt., *s.v.*).

It begins:

तौ संतोषयता सम्यौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥

तस्याद्यं ग्रन्थनालेखं क्रान्तच्युत्क्रान्तखण्डितं ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥

अथ परमात्मा विविच्यते ॥ तत्र तं जीवनिरूपणपूर्वकं निरूपयति द्वाभ्यां । क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः । ° (*Bh. P.*, v. 11, 12. 13).

The greater part of the treatise is wanting, the MS. ending abruptly (in the 71st paragraph) at the end of fol. 16*b*, in the middle of a word.

Cf. Rāj. Mitra, Notices, iv., p. 233 (foll. 67).

[H. T. Colebrooke.]

3528.

462a. Foll. 106; the same size and handwriting as in preceding MS.

Kṛishṇasandarbha, the 4th section of the *Bhāgavatasandarbha*, treating of *Kṛishṇa* as the divine spirit.

It begins: तौ संतोषयता सम्यौ ° ॥ तस्याद्यं ग्रन्थनालेखं ° ॥

अथ पूर्वसंदर्भत्रयेण यस्य सर्वपरत्वं साधितं तस्य श्रीभगवतो निर्धारणाय संदर्भोऽयमारभ्यते । तत्र प्रथमस्य द्वितीये वदन्तीत्यादिना तदेकमेव तत्त्वं ब्रह्मादितया शब्द्यत इत्युक्तं । तदेव ब्रह्मादित्रयं तस्य तृतीये विविच्यते । °

The subject is treated in 190 paragraphs, ending thus:

गौरश्यामलस्यामलाभिरमणीरत्नोर्विलासोत्सवैर्
नृत्यन्तीभिरशेषमादनकलावैदग्धदिग्धात्मभिः ।
अन्योन्यप्रियतासुधापरिमलस्तोमोन्मदान्नैः (°भिः R.M.) सदा
राधामाधवमाधुरीभिरभितश्चित्ते ममाक्राम्यतां (°त्तं °क्र°) ॥

इति कलियुगपावन ° श्रीभागवतसंदर्भे श्रीकृष्णसंदर्भो नाम चतुर्थः संदर्भः समाप्तः ॥

Cf. Rāj. Mitra, Notices, iv., p. 234.

On the first and last pages of this volume the two treatises contained therein are, by Colebrooke's Paṇḍit, assigned to *Rūpa Gosvāmin*. Cf. Burnouf's préf., p. clxvi.

[H. T. Colebrooke.]

3529.

707. Foll. 141 (counted 140; no. 61 being double); size 16 in. by 4¾ in.; clear, modern Bengalī writing, by two different hands; nine lines in a page.

Bhaktisandarbha, the 5th section of the *Bhāgavatasandarbha*, here ascribed (in the colophon) to *Sanātana Gosvāmin*; treating, in 330 paragraphs, of faith.

It begins: तौ संतोषयता सम्यौ ° ॥ तस्याद्यं ग्रन्थनालेखं ° ॥

अत्र पूर्वसन्दर्भचतुष्टयेन संबन्धो व्याख्यातः । तत्र पूर्णसनातनपरमानन्दलक्षणं पञ्चत्वरूपसंबन्धि च ब्रह्म परमात्मा भगवानिति त्रिभिराविर्भावतया शब्दितमिति निरूपितं । तत्र च भगवत्त्वेनैवाविर्भावस्य परमोत्कर्षः प्रतिपादितः । °

It ends: टीका च अन्तरङ्गां भक्तिमाह त्रिभिः । सर्वभूते चात्मनि चात्मानमीश्वरं स्थितं मामेव ईक्षतेत्येषा कथंभूतमीश्वरं बहिरन्तःपूर्णमित्यर्थः । तत्कुतः अपावृतं अनावरणं तदपि कुतः यथास्वं असङ्गत्वाविभुत्वाच्चेत्यर्थः । अत्र मामेवेति श्रीकृष्णरूपमेवेक्षते न तु केवलान्तर्यामिरूपमित्यभिप्रायेणैवान्तरङ्गां भक्तिमाह इति व्याख्यातं । ततश्च ।

इति सर्वाणि भूतानि सद्भावेन महाद्युते ।
सभाजयन्मन्यमानोज्ज्वानं केवलमाश्रितः ॥

ब्राह्मणे पुक्कसे स्तेने ब्रह्मघ्नकें स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक् पण्डितो गतः ॥

इति श्रीसनातनगोस्वामिविरचितः श्रीभक्तिसंदर्भः समाप्तः ॥

[H. T. Colebrooke.]

3530.

814. Foll. 212 (counted 211; no. 49 being double); size 15¾ in. by 5 in.; modern Bengalī handwriting; eight lines in a page.

Kramasandarbha, the 7th (and last) section of *Jīva's Bhāgavatasandarbha*, forming a running (and supplementing) commentary on the *Bhāgavatapurāṇa*. *Skandhas* I.–V.

It begins: श्रीराधाकृष्णाभ्यां नमः ॥ तौ संतोषयता मनौ ० ॥ तस्याद्य ग्रन्थनाले ० लिखति जीवकः ॥

पूर्वं यान्येव वाक्यानि धृतान्यर्थविशेषतः ।
तानि मूलक्रमेणापि धार्यैणि क्रमलब्धये ॥
धार्यैण्यर्थविशेषार्थमधृतान्यपि कानिचित् ।
तत्रेतिशब्दः कर्तव्यः क्वचिद्याख्या च केवला ॥
स्थानं च मुहुरङ्काभ्यां ज्ञेयं संदर्भवाक्ययोः ।
तत्राङ्कात्तत आ शब्दात्तदङ्कादिष्वतीष्यतां ॥
व्याशब्दात्तततव्याख्यागतं तद्वाक्यमीषतां (०मिष्यतां) ।
तथा पुनश्चेतिशब्दादन्यत्रापीति दृश्यतां ॥
यत्र व्याख्यागतं वाक्यव्याख्यानं तच्चिदाकृति ।
डौ तत्र प्रणवौ लेख्यौ तयोर्मध्यं तु गृह्यतां ॥
यः स्कन्धाध्याययोरङ्कः स तु तल्लेदकः स्फुटः ।
न तत्र प्रणवापेक्षापीति सर्वत्र वीक्ष्यतां ॥

अथ प्रथमस्कन्धस्य क्रमसंदर्भः ।

At the end of the first *skandha* (fol. 59) we read: इति कलियुगपावन ० श्रीरूपसनातनानुशासनभारतीगर्भे सप्तसंदर्भात्मकश्रीभागवतसंदर्भे प्रथमस्कन्धस्य क्रमसंदर्भः समाप्तः ॥

The final colophon runs thus: इति पञ्चमक्रमसंदर्भे षड्विंशः ॥ श्रीभागवतक्रमसंदर्भे पञ्चमक्रमसंदर्भः समाप्तः ॥

For MSS. of the first six *skandhas* of this work see Rāj. Mitra, Notices, iv., pp. 231, 235, 243–45.

On the margin of the last page Colebrooke's Pandit calls the work, in Devanāgarī: श्रीभागवतटी(!) श्रीरूपसनातनगोस्वामिकृता क्रमसंदर्भटीका प्रथमावधि पंचपर्यंत पत्र २११ श्लोक ६५०० ॥ Hence the mistake regarding the authorship of the work, repeated by Burnouf, préf., p. clxvi., from the old catalogue of the India House.

[H. T. Colebrooke.]

3531.

1174a. Foll. 32; size 13¼ in. by 4¾ in.; good, small, modern Bengalī handwriting; seven lines in a page.

Śrutistutyarthavivaraṇa, a philosophical commentary, by *Rādhāmohana*, on the so-called *Vedastuti* (*Śrutistuti* or *Śrutyadhyāya*)—the 87th *adhyāya* of the 10th *skandha* of the *Bhāgavatapurāṇa*—composed with the view of establishing *Kṛishṇa* as the *Brahman* or divine spirit.

The original text is only vaguely alluded to as '*ayaṃ granthaḥ*' (fol. 8*a*, l. 1 *infr.*), and as being composed in *ślokas* (fol. 3*a*, l. 2).

It begins:

प्रणम्य राधिकाकान्तं श्रीराधामोहनद्विजः ।
पूर्वदृष्ट्या यथाज्ञानं व्याकरोति श्रुतिस्तुतिं ॥

ब्रह्मेति टीकायां अप्रमाण्ये कारणरहितानामिति शब्दस्याप्रामाण्ये कारणत्वं भ्रमादिरूपदोषजन्यत्वं वेदवक्तुरीश्वरस्य तादृशदोषरहितत्वेन तदजन्यत्वं वेदानामित्यर्थः तत्प्रश्ने विषयत्वं सप्तम्यर्थः शब्दवृत्तिः । अर्थविशेषबोधानुकूलपदपदार्थयोः संबन्धविशेषः । ०

It ends: कैवल्येन अपृच्यत स्वभावेन निरस्ता तिरस्कृता योनिर्माया येन तं । अत एवाभयं भयनिवर्तकं ॥ ५० ॥ इति श्रुतिस्तुत्यर्थविवरणं ॥

Then follow three lines more, beginning: मापाततोभजनमात्रप्रवृत्त्यर्थं यथाकथकृद्भजने ऽपि लोकानामनर्थनिवृत्तिः स्यादिति ० and ending abruptly: केषाञ्चित् प्राक्तनपुण्यपुञ्जकृतपार्षदभावत्वात्—

The *Vaishṇavatoshaṇī* is frequently quoted in this treatise, which is probably only a part of a larger work on the whole of the 10th *skandha*.

On fol. 1*a* another hand calls the treatise '*śrutyadhyāyaṭīkā śrutistutināmnī*.'

For other commentaries on the same section of the *Purāṇa*, see Rāj. Mitra, Notices, ii., p. 349; vii., p. 222.

[H. T. COLEBROOKE.]

3532.

2540. Foll. 101 (of which fol. 42 is wanting, and fol. 57 supplied by another hand); size 11¼ in. by 4½ in.; fair Devanāgarī writing of about 1750 A.D.; nine lines in a page.

Nāmacandrikā, a commentary — by *Raghunātha*, son of *Viṭṭhala* and *Rukmiṇī*, and grandson of *Vallabha*(?) — on the *Kṛishṇasahasranāma*, or *Purushottamasahasranāma*, an enumeration of a thousand (or rather some 1050) epithets of *Kṛishṇa* in 256 *ślokas*, professing to be attached to the *Bhāgavatapurāṇa*.

The commentary begins:

व्रजस्त्रीविप्रयोगाग्निशमनाय य उत्थितः ।
दिनान्ते ऽद्भुतजीमूतस्तच्छायास्तु सदा मयि ॥ १ ॥

आचार्यचरणद्वंद्वं भक्तिज्ञानाब्जभास्करं ।
नमस्यामि मनःकर्मवाग्भिरंतस्तमोऽपहं ॥ २ ॥

यत्कृपादृष्टिवृष्टेन दैवदग्धो ऽपि तत्क्षणात् ।
प्ररोहति निजेच्छाभिस्तं वंदे कमपीश्वरं ॥ ३ ॥

इह तावत्त्रयं सकलनिगमकल्पपादपफलरूपश्रीभागवतशास्त्रस्य स्वल्पाक्षरैः सर्वपरिज्ञानार्थं तत्प्रतिपाद्य लीलाविशिष्टश्रीकृष्णसहस्रनामानि विवक्षवो वस्तुनिर्देशरूपं मंगलमाचरन्याचार्याः ॥ पुराणपुरुष इति ॥ गीतायामन्यत्रापि पुराणो यः पुरुषः स एव पुरुषोत्तमपदवाच्यः सो ऽत्र श्रीकृष्ण एव । °

Several editions of the original text, under the titles *Purushottamasahasranāma* (*-stotra*) and *Śrīkṛishṇasahasranāma*, have appeared in India.

It ends: ॥ २५५ ॥ श्रीकृष्णेति । श्रीकृष्णभक्तान् पाहीत्यन्वयः ° श्रवणमात्रेणैव परमकल्याणरूप इत्यर्थः ॥ २५६ ॥

कृष्णनामसहस्राख्यमालेयं वाङ्मणीमयी ।
ग्रथिता श्रुतिसूत्रेण रचिता कृष्णपादयोः ॥ १ ॥

श्रीविट्ठलतनूजेन रुक्मिणीगर्भसंभुवा ।
रघुनाथेन गाथेयं नामसु व्यरचि स्फुटा ॥ २ ॥

इति श्रीमद्वल्लभनन्दनचरणकमलपरागमात्रसनाथरघुनाथस्य कृतौ नामचन्द्रिका समाप्ता ॥

Besides quotations from *Purāṇas* and the epics, illustrative passages are constantly quoted (probably from the *Bhāgavatapurāṇa* itself) simply introduced by '*tad uktam*.' Sometimes we find '*tad uktam bhagavatā*' (foll. 5*b*, 10*a*, 15*b*, 16*b*) or '*bhagavān apy āha* (fol. 12*a*), where *Kṛishṇa* himself seems to speak. Otherwise only: अत एव आचार्यैरप्युक्तं fol. 11*a*; आचार्यैस्तथैवाम्नातं टीकायां fol. 66*b*.

[H. T. COLEBROOKE.]

3533.

1288. Foll. 48; size 13 in. by 5 in.; fair Devanāgarī writing of the latter part of last century; nine lines in a page.

Harilīlā, an *anukramaṇī* to the *Bhāgavatapurāṇa*, by *Vopadeva*; with a commentary, called *Harilīlāviveka*, by (*Hemādri*, revised by) *Madhusūdana Sarasvatī*.

The text begins:

श्रीमद्भागवतस्कंधाध्यायार्थादि निरूप्यते ।
विदुषा वोपदेवेन मंत्रिहेमाद्रितुष्टये ॥

The commentary begins:

नमः कृष्णाय नित्यैकसच्चिदानंदरूपिणे ।
जगत्सर्गविसर्गादिसाक्षिणे ऽचिंत्यशक्तये ॥

जयंति वोपदेवस्य वाचो विबुधसंस्तुताः ।
घनसारोज्ज्वलाभासाः क्षीरोदस्येव वीचयः ॥
श्रीमद्भागवतस्यानुक्रमणी तद्विनिर्मिता(ह्० Oxf.) ।
हरिलीलाभिधानेयं यथाबुद्धि विविच्यते ॥

The commentary ends:

हरिलीलाविवेको ऽयं कामराजस्य वेश्मनि ।
कटके रचयां चक्रे तुष्यै हेमाद्रिणा सतां ॥
इति श्रीहरिलीलाविवेकः समाप्तिमगमत् ॥
सरस्वतीश्रीमधुमूदनेन निर्व्यूढमेतद्बुधमोदनेन ।
जनः समस्तो ऽपि रसायनेन व्रजेशभक्तिं व्रजतादनेन ।
शतमष्टौ च पंचाशत्कृत्वं ग्रंथविनिर्मितं ॥

For more particulars about this work, cf. Aufrecht, Cat. Bodl., no. 92. See also Burnouf, préf., p. ciii.

For the verse in which the authorship of the commentary is ascribed to *Hemādri*, see the final verse of the same author's *Kaivalyadīpikā* (no. 3542).

[H. T. Colebrooke.]

3534.

484. Foll. 36; size 12½ in. by 5¼ in.; Devanāgarī writing; twelve lines in a page.

Harilīlā, with the *Harilīlāviveka*. A carelessly written, modern MS.

[H. T. Colebrooke.]

3535.

2791b. Foll. 26; size 10 in. by 5½ in.; good Devanāgarī writing of 1595 A.D.; eleven lines in a page.

Bhagavadbhaktiratnāvalī, or simply *Bhaktiratnāvalī*, a compendium of the principal tenets of *Vaishṇava* belief, in the form of verses extracted from the *Bhāgavatapurāṇa*, by *Vishṇupurī*, a native of Tīrabhukti. [A.]

It begins: ये मुक्तावपि निःस्पृहाः प्रतिपदप्रोन्मीलदानंदसं०

See Aufrecht, Cat. Bodl., no. 90; Florentine Sansk. MSS., no. 236; Rāj. Mitra, Notices, i., p. 240.

After the 12th chapter this MS. contains 16 verses (instead of 10 of the Oxf. MS.), counted (from the beginning of the work) 396–411, the last three of which, at all events, together with the colophon, evidently belong to the commentary:

साधूनां स्वत एव संमतिरिह स्यादेव भक्त्यर्थिनां०॥[४०]७॥
एष स्यामहमल्पबुद्धिविभवो ऽप्येको ऽपि वा स्यां ध्रुवं
मध्ये भक्तजनस्य मत्कृतिरियं न स्यादवज्ञास्पदं ।
किं विद्याः सरघाः[1] किमुज्ज्वलकुलाः किं पौरुषाः किं गुणास्
तत्किं सुंदरमादरेण रसिकैर्नापीयते तन्मधु ॥ [४०]८ ॥
इत्येषा बहुयत्नतः कृतवता[2] श्रीभक्तिरत्नावली
तत्प्रीत्यैव तथैव संप्रकटिता तत्कांतिमाला मया[3] ।
अत्र श्रीधरतः समोक्तिलिखने[4] न्यूनाधिकं यच्चभूत्
तत्क्षांतुं सुधियो ऽर्हथ स्वरचनालुब्धस्य मे चापलं॥[४०]९॥
महायज्ञशरप्राणशशांकगणिते शके ।
फाल्गुने कृष्णपक्षस्य द्वितीयायां सुमंगले ॥ [४]१० ॥
वाराणस्यां महेशस्य सान्निध्ये हरिमंदिरे ।
भक्तिरत्नावली सिद्धा सहिता कांतिमालया ॥ [४]११ ॥

इति श्रीमत्पुरुषोत्तमचरणारविंदकृपामकरंदबिंदुप्रोन्मीलितविवेकतैरभुक्तपरमहंसश्रीविष्णुपुरीग्रथितायां श्रीभागवतामृताब्धिलवश्रीमद्भक्तिरत्नावलीकांतिमाला(!) समाप्ता ॥

संवत् १६५२ वर्षे मधुमासे सिते पक्षे दशमीसोमवासरे लिखितमेतत् ॥ करकृतमपराधं क्षंतुमर्हंति संतः ॥ शंकरपुरकृतालयेन रामकृष्णेन लिखितेयं भगवद्भक्तिरत्नावली ॥ भट्टश्रीविट्ठलदास स्वात्मपठनार्थं च परोपकाराय ॥ शिवमस्तु सर्वजगतः ॥

There is some difficulty in reconciling the date of the work (Śaka 1555 = A.D. 1633–4;

[1] शरपा मधुमक्षिकाः comm. (see next MS.).
[2] खलु कृता B. [3] प्रिया B.
[4] श्रीधरमुक्तिलिखने(!) B; श्रीधरसन्नमोक्तिलिखने C.

cf. Florent. MS.) with the date (Samv. 1652 = A.D. 1595) of the present MS., which, as far as appearance goes, one could hardly take to be more modern. [COLL. OF FORT WILLIAM.]

3536.

2592. Foll. 92; size 11¾ in. by 5 in.; fair Devanāgarī writing of 1732 A.D.; nine lines in a page.

Vishṇupurī Tairabhukta's Bhagavadbhaktiratnāvalī, with the author's own commentary, entitled *Kāntimālā*. [B.]

See Rāj. Mitra, Notices, i., p. 240. The references to the *Bhāgavata* are always given, but they do not seem to correspond to the divisions of our editions.

The concluding verses of the preceding MS. are explained as far as v. 408, after which the text of v. 409 is given, followed by the colophon: इति श्रीपुरुषोत्तम° भक्तिरत्नावली सकांतिमाला समाप्ता ॥

Then follow the verses:

इति लिखनमनर्घ्यं यत्स्वविज्ञानहेतोर्
उत भवतु समस्तो दर्शनाद्विष्णुभक्तः ।
प्रचरतु हरिभक्तिग्राहिणी कापि शक्तिम्
तदखिलमखिलात्मन्नार्पितं माधवेन ॥

श्रीकांतस्य तमालशाखिन इव क्लेशच्छिदो जन्मना
नानाकेलिकथाफलानि मधुराण्याजह्रिरे यद्भुवि ।
लक्षीकृत्यपरिक्षितं शुकमुखाद्विस्तारितं तद्रसः
स्वैरं विष्णुपुरीकृतं ग्रथनमत्पात्रेण संपीयतां ॥

महायज्ञ° गणिते शके । फाल्गुने कृष्ण (marg. corr. शुक्ल) पक्षस्य° ॥ वाराणस्यां महेशस्य° ॥

इति श्रीहरिजीव्यासस्य पुस्तकं श्रीरामनाथेनालेखि ॥ संवत् १७८९ ॥

[MACKENZIE COLLECTION.]

3537.

1184 c. Foll. 39; size 13½ in. by 4¾ in.; fair, modern Bengalī handwriting; eleven lines in a page.

Kāntimālā, without the text of the *Bhaktiratnāvalī*. [C.]

It begins: सत्सदाचारानुमितश्रुतिबोधितप्रारिप्सितानविघ्नपरिसमाप्तिकारणं श्रीकृष्णकीर्तनरूपं मङ्गलमाचरति श्रीभागवतपद्येनैव °

In this MS. the verses up to 407 are likewise explained, and then the text of v. 408 is given; but the MS. omits the last two verses containing the date.

Colophon: इति श्रीभक्तिरत्नावली(!) समाप्ता ॥

[H. T. COLEBROOKE.]

3538.

946. Foll. 72; size 12 in. by 4¾ in.; fair, modern Devanāgarī writing; eight lines in a page.

Fragment of *Vishṇupurī's Bhaktiratnāvalī*, with an anonymous commentary in Hindi.

As far as fol. 67, the text (vv. 1–87 of the 1st chapter) agrees on the whole with that of the preceding MSS. After this there are only five more *ślokas*, which, however, are not found in this connection in the other MSS.

[H. T. COLEBROOKE.]

3539.

1234. Foll. 161 (counted 162, no. 153 being passed over); size 12½ in. by 6 in.; good, modern Bengalī handwriting; twelve, from fol. 64 ten, lines in a page.

Bhāgavata-Kathāsaṃgraha, also called *Haribhaktitaraṅgiṇī*, an epitome of the *Bhāgavatapurāṇa* with partial quotations of whole verses from the original, by *Keśava Śarman*, or *Keśava Pañcānana Bhaṭṭācārya*, as he calls himself at the end of *skandha* x.

It begins:

प्रणम्य जगतामीशं श्रीमत्केशवशर्म्मणा ।
कथा भागवती वाच्या हरिभक्तिरङ्गिणी ॥

अशीतिलक्ष इत्यादि यैर्न श्रुतमित्यादि ।
आगन्तुकव्याधिविघातहेतुरापीयते तिक्तकषायकादि ।
भवस्थिरव्याधिविनाशनाय न पीयते किं मधुरं पुराणं ॥

अथ नानाशास्त्रपुराणप्रबन्धैश्चित्रप्रसादमलभमानस्तत्तत्रा-परितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्य परमदेवतानुस्मरणलक्षणं मङ्गलमाचरति ॥

यं ब्रह्मवेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्भवः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशकाय ॥

तस्मै नमः यं वेदान्तिनो ब्रह्म वदन्ति मीमांसकाः परं कर्मात्मकं सांख्याः प्रधानं पातञ्जलाः पुरुषमन्तर्यामिनं नैयायिका ईश्वरमिति जगत्कारणं । वैशेषिका अपि वाशब्दात्परमात्मानं वदन्तीति सर्वत्रान्वयः ॥ सर्वविघ्ननाशकाय सर्वदर्शनसिद्धमुक्त्वा वेदान्तप्रतिपाद्यमेव परमवस्त्वित्याह ॥ ओं जन्माद्यस्य यतो° (*Bh. P.* I., 1) ॥ तं परं परमेश्वरं धीमहि ध्यायेम । अस्य विश्वस्य यतो जन्मादि जन्मस्थितिभङ्गं यतो भवति । अर्थेषु कार्येषु सर्वत्र सदृपेणान्वयात् । °

The *skandhas* end as follows: I., fol. 18*b*; II., fol. 21*b*; III., fol. 31*a*; IV., fol. 41*b*; V., fol. 49*b*; VI., fol. 58*a*; VII., fol. 63*b*; VIII., fol. 72*a*; IX., fol. 84*b*; X., fol. 144*a*; XI., fol. 155*a*; XII., fol. 162*b*.

It concludes with the two verses (*Bh. P.* XI., 20, 21): नमस्तस्मै भगवते° ॥ योगीन्द्राय नमस्तस्मै° ॥ followed by the colophon: इति श्रीभागवतकथासंग्रहः समाप्तः ॥

On the margin of the last page another hand has written, in Devanāgarī, the title *Bhāgavatasaṃgrahakathā*; and on fol. 1*a*, in Bengalī and Devanāgarī, *Bhāgavatasaṃgraha*.

The old number of the MS. was 464, under which the work is referred to by Burnouf, préf., p. clxvi.

For another work of the same title see above, no. 3518. [H. T. Colebrooke.]

3540.

1491c. Foll. 51; size 15½ in. by 4¼ in.; modern Bengalī handwriting; six lines in a page.

Saṃkshepa-Bhāgavatāmṛita, or *Laghu-Bhāgavatāmṛita*, an epitome of authoritative opinions regarding the divine nature of *Kṛishṇa*, his attributes, and his identity with the different manifestations of *Vishṇu*; abridged, by *Rūpa Gosvāmin*, from a more extensive compendium compiled by his brother, *Sanātana Gosvāmin*.

The MS. contains only the first *khaṇḍa*, called *Śrīkṛishṇāmṛita*, while the whole work seems to consist of two *khaṇḍas*, the second being apparently devoted to the praise of *Kṛishṇa's* female companion, *Śrī*.

It begins (with the numbers added):

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ।
यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ १ ॥ Cf. [p. 1275*b*, note.

कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदं ।
यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥ २ ॥

मुखारविन्दनिस्यन्दमरन्दभरतुन्दिनाः(°ला) ।
समानन्दं मुकुन्दस्य संदृग्धां वेणुकाकलीं ॥ ३ ॥

श्रीचैतन्यमुखोद्गीर्णा हरे कृष्णेति वर्णिकाः ।
मज्जयन्तो जगत्प्रेम्णि विजयन्तां तदाह्वयाः ॥ ४ ॥

श्रीमत्प्रभुपदाम्भोजैः श्रीमद्भागवतामृतं ।
यद्यतानि तदेवेदं संक्षेपेण निषेव्यते ॥ ५ ॥

इदं श्रीकृष्णतद्भक्तसंबन्धादमृतं द्विधा ।
आदौ कृष्णामृतं तत्र मुहुर्मुहुः परिविष्यते ॥ ६ ॥

निर्बन्धं युक्तिविस्तारे मयात्र परिमुञ्चता ।
प्रधानत्वात्प्रमाणेषु शब्द एव प्रमाण्यते ॥ ७ ॥

अतस्तैः शास्त्रयोनित्वादिति न्यायप्रदर्शनात् ।
शब्दस्यैव प्रमाणत्वं स्वीकृतं परमर्षिभिः ॥ ८ ॥

किं च तर्काप्रतिष्ठानादिति न्यायविधानतः ।
अमीभिरेव मुख्यत्वं तर्कस्यानादरः कृतः ॥ ९ ॥

अथोपास्ये मुमुख्यत्वं वक्तुमुत्कर्षभूमतः ।
कृष्णस्य तत्त्वरूपाणि निरूप्यन्ते क्रमादिह ॥ १० ॥
स्वयंरूपस्तदेकात्मरूप आवेशनामकः ।
इत्यसौ त्रिविधं भाति प्रपञ्चातीतधामसु ॥ ११ ॥
तत्र स्वयंरूपः ॥
अनन्यापेक्षि यद्रूपं स्वयंरूपः स उच्यते ॥ १२ ॥
यथा ब्रह्मसंहितायां ॥ ०

The work is founded mainly on the *Bhāgavatapurāṇa;* but, by way of illustration, extracts are given from other *Purāṇas* and similar works, such as *Vishṇudharmottara, Mathurākhaṇḍa* of the *Skandapurāṇa* (fol. 44*b*), *Bṛihadvaishṇava* (fol. 42*a*), *Nāradapañcarātra, Bhagavadgītā,* and *Harivaṃśa.* Each passage is followed by a short gloss (*kārikā*) added by the compiler.

It ends: यथा तत्त्वे ।

कन्दर्पकोट्यर्बुदरूपशोभा
नीराज्य पादावुलखाच्चलस्य(!) ।
कुत्राप्यदृष्टश्रुतिरम्यकान्तेर्
ध्यानं परं नन्दसुतस्य वक्ष्ये ॥

द्वादशमे च । त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोगाद्विद्रुममृगाः पुलकान्यबिभ्रन्निति ॥ इति संक्षेपभागवतामृते श्रीकृष्णामृतं नाम पूर्वखण्डं ॥

The title '*Laghubhāgavatāmṛita*' — which also appears in a MS. in Bühler's Cat. of Gujarāṭ etc. MSS., ii., p. 26 (where no author's name is given) — is inscribed, both in Bengalī and Hindī, on the first page of the MS. It is doubtless meant to convey the same idea as the '*Saṃkshepabhāgavatāmṛita*' of the colophon. In Kielhorn's Cat. of Sansk. MSS. in the Central Provinces (Nagpur 1874) a work of the latter title is attributed (probably erroneously) to *Kṛishṇacaitanya* himself; whilst in Stein's Cat. of Kashmir MSS. (p. 225) no author is mentioned. A *Bhāgavatāmṛita* is mentioned as one of *Sanātana's* works at the end of a MS. (Rāj. Mitra, Notices, vi., p. 193) of that author's *Vaishṇavatoshiṇī* (in an epilogue added thereto by his nephew, *Jīva Gosvāmin*); cf. also Wilson, Essays on the Rel. of the Hindus, i., p. 167; and according to the commentator's explanation (see next MS.) of v. 5 of the introduction, the present work is an abridgment of *Sanātana's* compendium. Wilson, *l.c.*, also credits *Rūpa* with a *Laghubhāgavata,* or abridgment of the *Bhāgavatapurāṇa.*

For another MS. of the same section of the work, see Roth's Cat. of Tübingen MSS., p. 16. [H. T. Colebrooke.]

3541.

1418. Foll. 116; size 12½ in. by 4¾ in.; fair, modern Bengalī handwriting; six lines in a page.

A commentary on the *Saṃkshepa-Bhāgavatāmṛita,* by *Rādhāmohana Śarman.* Incomplete.

It begins:

राधामुखेन्दुकिरणामृतलोभलोल-
चक्षुश्चकोरपरिहारितमालरूपः ।
रज्यन्नवीनरमणीनलिनीपरीतः
को[ऽ]पि व्रजेन्द्रतनयः परिपातु विश्वं ॥
नत्वा श्रीचरणाम्बुजं परिनमद्वृन्दावनान्तःस्थली-
क्रीडाकाननलम्पटस्य मुरनीरावामृतोद्घर्षिणः ।
श्रीमद्भागवतामृतं सुमधुरं व्याख्यायते श्रीमता
राधामोहनशर्मणा भगवती ऽद्वैतस्य वंशोद्भवा ॥
वन्दे चैतन्यचन्द्रं तमद्वैताद्वैतविग्रहं ।
नित्यानन्दमयं कृष्णचरणाम्बुजलिप्सया ॥

प्रारिप्सितग्रन्थसमाप्तिप्रतिकूलविघ्नपरम्परापराभावुकश्रीकृष्णप्रणतिरूपं मङ्गलमादौ शिष्यशिक्षायै दशमनारदोक्तपादान्* दर्शयति । नमस्तस्मा इति ।

---

* *Bhāg. P.* (Bomb. 1853) x., 87, 46: नारद उवाच ॥
नमस्तस्मै भगवते कृष्णायामलकीर्तये ।
यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥

Fol. 5*b*: श्रीकृष्णस्वरूपनिरूपणे ग्रन्थे ऽस्मिन् शिष्यप्रवृत्त्यर्थं यो धत्ते इत्यादिना प्रदर्शितभक्त्यानुग्राहकत्वदार्ढ्याय परमाराध्यत्वप्रदर्शनाय च एकादशस्यपद्यमुद्योतयति । कृष्णवर्णेति (*Bh. P.* xi., 5, 33) ।

Fol. 8*b*: भगवन्नमस्कारादिकं तत्संपर्कमात्रेण वेणुध्वनिरपि (रेणु° MS.) ममाभीष्टं संपादयितुं समर्थ इति मनसिकृत्य तमेव प्रार्थयते । मुखारविन्देति । ° मुखारविन्दात् निस्यन्दो निर्गमनमरन्दभरः मकरन्दनिकरस्तेन तुन्दिला तत्पूरितत्वेन मधुरा (!) मम मयि आनन्दं आनन्दस्वरूपं श्रीकृष्णं तद्भावं वा संदुग्धां प्रकटयतु । °

Fol. 9*a*: इदानीं शिष्यप्रवर्त्तनाय ग्रन्थस्य प्रेक्षावत्संमतत्वमाह श्रीमदिति श्रीमद्प्रभुमुखाम्भोजैः श्रीमद्व्यसनातनगोस्वामिमुखपद्मैः मुखचन्द्रैरिति वा यद्यतानि विस्तारितं भागवतामृतं भगवत्स्वरूपनिरूपणादिरूपममृतं एतेन भागवतममृतं यत्रेति व्युत्पत्त्या ग्रन्थनामापि ज्ञेयं तदेव तदर्थतात्पर्यैकमेव इदमनुपदवक्ष्यमाणभागवतामृतास्यं संक्षेपेण निपेप्यते निबध्यते मया रूपगोस्वामिनेति शेषः ।

As contained in this MS., the commentary does not even extend to the end of the first section, but breaks off abruptly, in the middle of fol. 116*b*, in the comment on a *kārikā* — मथुरामिति विस्पष्टं मथुरामण्डले व्रजं । तदानीं सुहृदां तत्र मधुपुर्यामभावतः ॥ — found on fol. 48*a*, l. 1 of the MS. of the text. There being no colophon, the title of the commentary is not given in the MS. itself; but on fol. 1*a* another hand has inscribed, in Devanāgarī, the erroneous title श्रीराधामोहनगोस्वामिकृतबृहद्भागवतामृतं.

The MS. is referred to, under its old number 1532, by Burnouf, préf., p. clxvi.

[H. T. Colebrooke.]

3542.

2034. Foll. 145; size 12¾ in. by 5¼ in.; good Devanāgarī writing, of about 1700 A.D.; 7–14 lines in a page.

Muktāphala, a summary of *Vaishṇava* doctrines as propounded in the *Bhāgavata-purāṇa*; composed by *Vopadeva*, son of the physician *Keśava*, and pupil of *Dhaneśa*; with a commentary, entitled *Kaivalyadīpikā*, composed (at his father's house in Kaṭaka) by *Hemādri*, son of *Kāmadeva*, and at the time minister of king *Rāmarāja* (or *Rāmacandra*, A.D. 1271–1309) of Devagiri. [A.]

Vopadeva's work, being exclusively based on the *Bhāgavata*, is sometimes described * as a mere commentary or gloss on that *Purāṇa*. It consists of three divisions, treating respectively: (*a*) of the nature of *Vishṇu*, and the true mode of his worship (*Vishṇubhakti*), foll. 1–54; (*b*) of the duties and rites to be performed by his votaries (*Vishṇubhaktijanya*), foll. 54–74; (*c*) of the nine different grades or dispositions (*rasa*) to be attained by them successively in the perception of his all-pervading power, foll. 75–145.

The text begins:

विष्णुं पंचात्मकं वंदे भक्त्याष्टादशभेदया ।
सांगवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥ १ ॥

विष्णुप्रीत्यै चतुर्वर्गचिंतामण्यामजोगणत् ।
भेदान्व्रतानां दानानां तीर्थानां मोक्षवर्त्मनां ॥ २ ॥

मूर्तिप्रासादपूजानां हेमाद्रिर्गणकायणीः ।
विष्णुभक्त्यंगभक्तानां गणयत्युक्तसारधीः ॥ ३ ॥

मुक्ताफलेन ग्रंथेन सद्भागवतशुक्तिना ।
भक्तिस्वात्यंबुना मुग्धमार्कंडेयशिशुश्रिया ॥ ४ ॥

मुक्ताफलं मुखचितस्फुटभक्तिभेद-
प्रत्यग्धराजितलसत्पदपद्मरागं ।
हेमाद्रिसंभवसुवर्णनिवेशरम्यं
कंठे कुरुध्वमवरुंध्वमपूर्वलक्ष्मीं ॥ ५ ॥

तत्रादौ विष्णुप्रकरणं ॥ तत्र विष्णोर्लक्षणं भेदाश्च ॥

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च यो ऽवशिष्येत सो ऽस्म्यहम् ॥ ६ ॥

* As, for instance, in *Gopālācārya's Bhāgavatabhūshaṇa*, printed at Bombay and Benares.

स द्वेधा। निराकारः साकारश्च। अनवच्छिन्नं चैतन्यं निराकारः। सत्त्वावच्छिन्नं चैतन्यं साकारः॥ रजस्तमोभ्यां युक्ते सत्त्वे पुरुषः। रजसा ब्रह्मा। तमसा रुद्रः। शुद्धे विष्णुरेव। °

Hemādri's commentary, *Kaivalyadīpikā*, begins:

यज्ज्योतिरुन्मिषति चेतसि धर्ममेघम्
आतस्युषामिह वशे परिकर्ममुख्यैः।
तच्छुद्धसत्त्वमुकुरप्रतिबिंबभावात्
कृष्णाभिधामुपगतं भुवि भावयेम॥ १॥

समूलघातं प्रणिहत्य योऽंधं
मृणालिनीं चेतयते मनीषां।
यत्पादसंगाज्जगती कृतार्था
गुरुं विवस्वंतमिहानुवे तं॥ २॥

श्रीवोपदेवस्य निधेर्गुणानां
जयंति ते ते भुवि वाग्विलासाः।
विकुंठ्य येषु स्वयमीश्वरो ऽपि
सर्वज्ञशब्दं स्वमवैति रूढं॥ ३॥

अस्मिन्समस्तिन्नपि वाङ्मयाब्धाव्
अपारपारीणमनीषयोच्चैः।
विवृण्वतश्चिज्जडवस्तुभेदं
गुणा गणेया भुवि नास्य कैः कैः॥ ४॥

अमुष्य वैदग्ध्यनिधेर्हृदिस्पृशो
मुदं ददंते ऽत्र न कस्य सूक्तयः।
मुक्ता मृषाद्वेषिमनांस्यनारतं
वियोगिहृंदीव कलाः कलानिधेः॥ ५॥

तेन मुक्ताफलं तेने यल्लोकमनुगृह्णता।
तत्र टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकां॥ ६॥

सृष्टां त्रिलोकगुरुणार्धमिवेंदुलेखां
सर्वज्ञमंडनकरीमकलंकशंकां।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
कुर्यामिमां तदिह यांतु बुधाः प्रसादं॥ ७॥

इह मुमुक्षूपकाराय रुचिरं प्रकरणं चिकीर्षुराचार्यस्तस्य परिसमाप्तिप्रचयपरिपंथिविघ्नविघाताय शिष्टाचारपरिपालनाय च समुचितेष्टदेवतां वंदमानस्तत्प्रतिपाद्यमर्थं श्रोतृप्रवृत्त्यंगतया संक्षिप्याह। विष्णुमित्यादि। °

From the comments on vv. 2–5 (throughout interpreted in a double sense) we extract the following passages:

इह च स्वकर्तृकत्वे ऽपि यदुराजमहामंत्रिणा हेमाद्रिणा अभ्यर्थितस्तत्कर्तृकत्वं ख्यापितवान्। तदेवाह। विघ्नित्यादि। चतुर्णां धर्मादीनां वर्गश्चतुर्वर्गः। तत्रेष्टसमर्पको ग्रंथश्चिंतामणिः। मणिर्द्वयोरित्यभिधानात् स्त्रीत्वं तस्यां हेमाद्रिर्व्रतादिभेदानजीगणत्। °॥ गणकाग्रणीः। गणकेषु देशकोशयोरायव्ययौ लिखत्सु अग्रणीर्मुख्यः। °॥ सती प्रशस्ता भागवतमेव शुक्रिर्जन्मस्थानं यस्य तत्तथा तेन भक्तिर्भजनं कर्तुरनुरागः स एव स्वात्मंबु यस्य तत्तथा तेन। °। मुग्धो भ्रांतः मार्कंडेयो यस्मिन् शिशौ शिशुरूपे विष्णौ स तथा तस्य श्रीः शोभा यस्मात्तत्तथा तेन। भाषितपुंस्कत्वाद्विभाषाभावः। मार्कंडेयो हि हिमवति पुष्पभद्रातीरे भगवन्मायां दिदृक्षुरतिदीर्घं तपस्तप्यमानः कदाचित्प्रसन्नेन भगवता प्रकटितायां मायायां निखिललोकसंप्लवोदके मुहुर्मज्जनोन्मज्जनानि भजन् अकस्माद्वटपर्णसंपुटे शयानमतिसुंदरं भगवद्बालमालोक्य प्रमुमोह। यो हि मुनिः पुंजिकस्थलादिविभ्रमे पुनर्वैभ्राम सो ऽप्यत्र मुग्ध इति शिशोः सुंदरत्वमुक्तं तस्याप्येतदलंकार इत्यतिशयः। एकं च मुक्ताफलं प्रायेण बालानलं करोतीति भंगिविशेषोक्तिः। °॥ हेमाद्रिः पुरुषविशेषः तत्संभवानि तेनोच्चारितानि सुष्ठु सुरेखाणि यानि वर्णानि अक्षराणि तेषां निवेशेन तत्र तत्रोचितस्थानेषु न्यासेन रम्यं सुश्लिष्टं। वर्णग्रहणेन स्ववाक्यानां श्लोकत्वमुक्तं। तत्कंठे कुरुध्वं कंठस्थं यथा स्यात्तथा ऽभ्यस्यध्वमित्यर्थः। °

The text of the *Muktāphala* ends (with the numbers supplied from MS. B):

उन्नायतीनामरविंदलोचनं
व्रजांगनानां दिवमस्पृशद् ध्वनिः।
दध्नश्च निर्मंथनशब्दमिश्रितो
निरस्यते येन दिशाममंगलं॥ [४५]॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायंतु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजतादधोक्षजे
ऽप्यावेश्यतां नो मतिरप्यहेतुकी॥ [४६]॥

चतुरेण चतुर्वर्गचिंतामणिवणिज्यया।
हेमाद्रिणार्जितं मुक्ताफलं पश्यत कौतुकात्॥ [४७]॥

निर्मथ्य पयसां राशिं मंदरः कौस्तुभं न्यधात्।
हेमाद्रिर्वचसां मुक्ताफलं रत्नं हृदि प्रभोः॥ [४८]॥

हेमाद्रिमाद्रियत एव गुणेन येन
तेनैव पूरितमुखेन सुबद्धमेतत् ।
मुक्ताफलं प्रतिफलज्जगदीशरूपं
यत्कर्णकंठकुहरे सुषमास्य काचित् ॥ [४९] ॥

द्वे एव चित्रे रामस्य सिंधुर्बद्धः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सूर्यवृत्तप्रदक्षिणः ॥ [५०] ॥

विद्वद्वनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत् ॥ [५१] ॥

स्वर्गे गीर्वाणनाथः सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले नागराजः फणिपतिसदृशो यस्य गायंति कीर्तिं ।
यस्तीर्णः शास्त्रपाथोनिधिमखिलमदो ग्रंथरत्नं सुवृत्तं
चक्रे शिष्यो धनेशः कविकुलतिलकः कैशवि[र्वो]पदेवः ॥

इति मुक्ताफलं समाप्तं ॥

The last verse is not found in the other MSS., nor is it explained in the *Kaivalya-dīpikā*, from which we extract a few passages of comment on the preceding verses (again explained in a double sense):

इह च स्वकर्तृके ऽपि यदुराजमहामंत्रिणा हेमाद्रिणा ऽभ्यर्थित आचार्यैस्तत्कर्तृकत्वं ख्यापितवानिति प्रागुक्तं तदेतत्पर्यंते ऽपि स्फावयन्नाह चतुरेणेति । चतुर्वर्गचिंतामण्याख्ये ग्रंथमहोदधेर्वैणिज्या तया चतुरेण विदितग्रंथरचनारीतिविशेषेण । यथा हि वणिज्यायां तत्तद्देशेभ्यस्तानि प्रियवस्तून्याहृत्य पुमान् तत्तद्विषये चतुरो भवति तथैतेन तत्तत्स्मृतीतिहासपुराणादिभ्यस्तानि तानि निःशेषव्रतदानतीर्थमोक्षादिप्रतिपादनपराणि वाक्यान्याहृत्य ग्रंथ-रचनायां कौशलमामादितं । ततस्तयैव रेखया भागवतस्य तत्तत्स्कंधेभ्यस्तानि तानि विष्णवादिवस्तुचतुष्टयप्रतिपादनपराणि पद्यान्युद्धृत्य मुक्ताफलाख्यं प्रकरणं कृतं । ० [४७] ॥ ० पयसां राशिं क्षीरोदं मंदरो मंथाचलः न्यधात् निक्षिप्तवान् हेमाद्रिर्मेरुः कामदेवात्मजश्च वचसां राशिं भागवताख्यं निर्मथ्य मुक्ताफलाख्यं रत्नं ग्रंथं च प्रभोः श्रीकृष्णस्य हृदि न्यधादित्यर्थः ॥ [४९] ॥ द्वे एवेति । रामो दाशरथिर्देवगिरीश्वरश्च तस्य पुरा त्रेतायां चरित्रेषु मध्ये द्वे एव चित्रे यत्सिंधुः समुद्रो बद्धः यच्च हेमाद्रिर्मेरुः स्वमुपानीतः स्वस्य निकटीकृतः । किंभूतस्य सूर्यस्य रथेरावृत्ता आवृत्तिं गता प्रदक्षिणा परिभ्रमणा यस्मिन्मेरौ स तथा । ० । अन्यत्रैव तस्य तु रामस्य अधुना यदुकुले अवतीर्णस्य द्वे एव चित्रे यत्सिंधुर्गजमदो बद्धः । सिंधुशब्देन तडंतो गजा लक्ष्यंते । सिंधुरिति जातावेकवचनं । प्रत्यर्थिनो राज्ञः पराभूय तत्सिंधुराः स्वगृहे बद्धा इत्यर्थः । यच्च हेमाद्रिर्द्विजविशेषः स्वमुपानीतः स्वसाम्राज्यस्य महामात्यस्य पदे ऽधिकर्तुमित्यर्थः । कीदृशः । सूरिषु पदवाक्यमप्रतीति (*r.* पदवाक्यप्रमाणादिप्रवीणेषु with B,C) आवृत्ता शतशः क्रियमाणत्वादावृत्तिं गता प्रकृष्टा दक्षिणा दानं यस्य स तथा । को हि नाम बृहस्पतिमपि प्रज्ञया प्रहसत-स्तादृशस्य मंत्रिस्य शिरोमणेर्निजनिकटीकरणाच्चित्रायते ॥ [५०] ॥ विद्वद्वनेशशिष्ये[णेत्यतिरोहितार्थं] ॥ [५१] ॥ ० । यत्किंचिदत्रभवतः खलु वोपदेवसूरेः कृतिर्निजधिया परिवर्त्यते मे । उद्दिश्य(!) कोविदजनोपकृतिं तदेतदाराधनं भगवतः परमेश्वरस्य ॥

छायावतीममृतदामपि नैकचित्रां
पुण्यप्रपामिव भुवि प्रथितां तदीयां ।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
ग्रंथः कृतो ऽत्र कृतिनां हृदुपैति तेषां[1] ॥

अतत्त्वे तत्त्वधीर्येषां तत्त्वे वातत्त्वधीर्नृणां ।
न तानानंदयत्येता वोपदेवस्य सूक्तयः ॥

यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबंधा दश
प्रख्याता नव वैद्यके ऽप्य तिथिनिर्धारार्थमेको ऽद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्ते(०क्तौ B, C) त्रय-
[स्तस्य भु(०स्य च C)-
ष्यंतर्वाणि(भूगिर्वाण C)शिरोमणिरिव गुणाः के केन
[लोकोत्तराः ॥

टीकां मुक्ताफलस्येमां नाम्ना कैवल्यदीपिकां ।
हेमाद्रिः कटके चक्रे कामराजस्य वेश्मनि ॥

इति हेमाद्रिदेवविरचिता मुक्ताफलटीका समाप्ता ॥

[GAIKAWAR.]

3543.

55. Foll. 163 ; size 10¼ in. by 4½ in. ; careless Devanāgarī writing of the latter part of last century ; ten lines in a page.

Vopadeva's Muktāphala (foll. 52), followed by *Hemādri's Kaivalyadīpikā* (foll. 112 ; part of fol. 91, and the whole of fol. 92 being, however, left blank). [B.]

[1] हृदयैतुयैतुतोषं B ; हृपुपैतु तोषं C ; ?*r.* हृदयं तुतोष ॥

The gap in the commentary extends from fol. 107*b*, l. 1, to fol. 108*b*, l. 2 *infra* in A.

Though much less correct than A, this copy is very useful in correcting the not infrequent mistakes of that MS.

[H. T. COLEBROOKE.]

3544.

1229. Foll. 141 (numbered 140, no. 92 being double); size 11¼ in. by 6 in.; Devanāgarī writing; European paper (watermark 1801); 7–15 lines in a page.

Muktāphala, with the *Kaivalyadīpikā*. [C.]

To the four verses of the epilogue of the commentary this MS. adds the following:

सकलविबुधमानः श्रीनिकेतंवदान्यः(?°ते च°)
समदविबुधसिंहः श्रीनिवासांघ्रिसेहः(°वः)।
जयति विनयसिंधुर्वामनेशः सुबंधः
प्रणतसकलभूपः कृष्णवंशैकदीपः॥

इति श्रीवोपदेवकृता मुक्ताफलटीका कैवल्यदीपिका समाप्ता॥

[H. T. COLEBROOKE.]

3545.

846d. Foll. 7; size 12 in. by 4¾ in.; good, modern Devanāgarī writing (European paper); seven lines in a page.

Durjanamukhacapeṭikā, 'a slap in the face of wicked men,' being a vindication of the *Bhāgavata* as one of the original *Purāṇas* promulgated by *Vyāsa*, and not the work of *Vopadeva*; professing to have been written by *Rāmāśrama*.

A note in Colebrooke's hand, on the margin of the last page, however, states that "*Maṇirām Tārā* is of opinion that this little tract is not the work of *Rāmāśrama*, but of *Rāma Kṛishṇa Bhaṭṭa*, a *Paṇḍit* now living at Benares. *Rāmāśrama* was pupil of *Bhaṭṭoji*." E. Burnouf, who has translated this tract in his preface to the *Bhāgavatapurāṇa* (p. 59), on the other hand, is in favour of *Rāmāśrama's* authorship, on the ground that the author of the *Capeṭikā* dates *Vopadeva* five centuries back instead of six, as the contemporary of Colebrooke ought to have done.

It begins:

वल्लवीवल्लभं नत्वा ब्रुवे विद्वद्विनिश्चयम्।
भागवताभिधे ग्रंथे आर्षानार्षत्वसंशये॥ १॥

भागवतमनार्षमिति वदंतः प्रष्टव्याः कथमनार्षत्वमिति ग्रंथे व्यासनामदर्शनात्। यो हि ग्रंथं कृत्वा ऽन्यस्य नाम लिखति स हि प्रीत्या यथा विद्यारण्यैर्वेदभाष्ये माधवनाम। धनादिलोभाद्वा यथा वोपदेवेन हेमाद्रेर्नाम। °

Fol. 2*a*: किं च। माध्वेन विजयध्वजेन भागवते टीकाकृता तत्रादावष्टौ टीका अवलोक्येत्युक्तं हनुमट्टीकां शंकराचार्यटीकां चेत्याद्युक्तं तत्कथं संगच्छतां। वोपदेवस्य षट्शती संवत्सराणां व्यतीता शंकराचार्याणां सप्तदशशती व्यतिक्रान्ता। °

It ends: ननु स्मृतीनामृषिप्रणीतत्वे सति वेदाविरुद्धार्थैकत्वेन प्रामाण्यमिति चेन्न लाघवेन वेदार्थैकत्वेन तत्प्रामाण्यस्योचितत्वात्॥ इति श्रीरामाश्रमविरचिता दुर्जनमुखचपेटिका समाप्ता॥

For a second treatise of the same title see above, no. 3367.

[H. T. COLEBROOKE.]

3546.

846c. Foll. 9; the same size and hand.

Durjanamukhapadmapādukā, 'a kick in the face of wicked men,' being a reply, by an unknown author to the preceding tract; advocating *Vopadeva's* claim to the authorship of the *Bhāgavatapurāṇa*. Translated by Burnouf, préf., p. 73.

It begins: यदुक्तमत्र च व्यासनामलेखने ग्रन्थकर्तुः किं कारणं। नापि धनादिलोभो नापि प्रीत्यतिशय इति। तत्र पृच्छामः। यदत्र शेमुषीवैशद्यं दर्शयता भवता वेणावाभिमत-भागवतनिर्माणे धनादिलोभो न कारणमित्युच्यते तत्किं व्यासस्य धनादिविघ्राणनसामर्थ्यविरहादाहो स्विद्ग्रन्थकर्तुर्निःस्पृहत्वात्।°

It ends:

इह जगति खलानां कण्टकानां द्विधैव
प्रतिकृतिरतिरम्या प्रोदिता पण्डितेन्द्रैः।
निकटमुपगतानामास्यभङ्गो ऽङ्गिरक्षैर्
व्यवहितवसतीनां सर्वथोपेक्षणैव॥

इति दुर्जनमुखपद्मपादुका समाप्ता॥

[H. T. Colebrooke.]

3547.

457. Foll. 208; size 16¾ in. by 5 in.; clear Bengalī handwriting; European paper (watermark 1802); eight lines in a page.

Mahā-Bhāgavatapurāṇa, an apocryphal *Purāṇa* recounting the story and exploits of *Devī*, and urging her claims to being worshipped as the supreme deity.

The MS. contains only *Khaṇḍa* I., consisting of 80 *adhyāyas*. Perhaps, however, the work was never carried any further.

The first *adhyāya* runs as follows: ओं

नारायणं नमस्कृत्य °॥

यामाराध्य विरिञ्चिरम्य जगतः सृष्टा हरिः पालकः
संहर्ता गिरिशः स्वयं समभवद् ध्येया च या योगिभिः।
यामाद्यां प्रकृतिं वदन्ति मुनयस्तत्त्वार्थविज्ञाः परां
तां देवीं प्रणमामि विश्वजननीं स्वर्गापवर्गप्रदां॥

या स्वेच्छयास्य जगतः प्रविधाय सृष्टिं
संप्राप्य जन्म च तथा पतिमाप शम्भुं।
उग्रैस्तपोभिरपि यां समवाप्य पत्नीं
शम्भुः पदं हृदि दधे परिपातु सा वः॥

एकदा नैमिषारण्ये शौनकाद्या महर्षयः।
पप्रच्छुर्मुनिशार्दूलं सूतं वेदविदां वरं॥

ऋषय ऊचुः॥

व्यासशिष्य महाप्राज्ञ सर्ववेदविदां वर।
पुराणं सांप्रतं ब्रूहि स्वर्गमोक्षसुखप्रदं॥

विद्यते विस्तृतं यत्र देव्या माहात्म्यमुत्तमं।
जायते च दृढा भक्तिर्यस्य संश्रवणेन वै।
देव्यां ज्ञानविहीनानां नृणामपि महामते॥

सूत उवाच॥

यदुक्तं श्रीमहेशेन नारदेन महात्मना।
पुराणं परमं गुह्यं महाभागवताह्वयं॥

तदाह भगवान्व्यासः श्रद्धया भक्तिशालिने।
स्वयं जैमिनये पूर्वं पुनस्तत्तो ब्रवीम्यहं॥

गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन।
एतस्य श्रवणे पाठे यत्पुण्यं जायते द्विजाः॥

तद्वक्तुं न महेशो ऽपि शक्तो वर्षशतैरपि।
किमहं कथयिष्यामि संख्याविरहितं यतः॥

श्रुत्वैव विस्मयाविष्टा ऋषयस्ते ऽतिहर्षिताः।
पुनरूचुर्मुनिश्रेष्ठं सूतं वेदविदां वरं॥

ऋषय ऊचुः॥

यथा पुराणश्रेष्ठं तत् प्रकाशमभवत्क्षितौ।
एकदाचक्ष्व (श्रत°) तत्त्वेन कृपया मुनिपुङ्गव॥

सूत उवाच॥

महर्षिर्भगवान् व्यासः सर्ववेदविदां वरः।
अशेषधर्मशास्त्राणां वक्ता ज्ञानी महामतिः॥

कृत्वा सप्तदशैतानि पुराणानि महामुनिः।
न तृप्तिमभिलेभे स कथंचिदपि धर्मवित्॥

महापुराणं परमं यत्परं नास्ति भूतले।
भगवत्याः परं तत्त्वं माहात्म्यं यत्र विस्तृतं॥

तत्कथं वर्णयिष्ये ऽहमिति चिंतापरायणः।
देव्यास्तत्त्वमविज्ञाय क्षुब्धचित्तो बभूव सः॥

यस्यास्तत्त्वं न जानाति महाज्ञानी महेश्वरः।
तस्याः कथं परं तत्त्वं ज्ञातव्यमिति दुष्करं॥

विचिन्त्यैवं महाबुद्धिश्चचार परमं तपः।
गत्वा हिमवतः पृष्ठं दुर्गाभक्तिपरायणः॥

तेनैव तपसा तुष्टा सर्वाणी (श्र°) भक्तवत्सला।
अदृष्टरूपा चाकाशे स्थित्वेदं वाक्यमब्रवीत्॥

यत्र ताः श्रुतयः सर्वा ब्रह्मलोकं महामुने ।
गच्छ तत्र परं तत्त्वं मम वेत्स्यसि निष्कलं ॥

प्रत्यक्षतां गमिष्यामि तत्रैव श्रुतिभि[:] स्तुता ।
तच्च संपादयिष्यामि तवाभिलषितं च यत् ॥

तच्छ्रुत्वा भगवान्व्यासो ब्रह्मलोकं तदा ययौ ।
वेदान्प्रणम्य पप्रच्छ किं ब्रह्म परमव्ययं ॥

ऋषेस्तद्वचनं श्रुत्वा विनयावनतस्य वै ।
वेदाः प्रत्येकतः प्राहुस्तत्क्षणान्मुनिपुंगवं ॥

ऋग्वेद उवाच ॥

यदन्तःस्थानि भूतानि यतः सर्वं प्रवर्तते ।
यदाहुस्तत्परं तत्त्वं साद्या भगवती स्वयं ॥

यजुरुवाच ॥

या यज्ञैरखिलाधीशा योगेन च समिज्यते ।
यतः प्रमाणं हि वयं सैका भगवती स्वयं ॥

सामोवाच ॥

ययेदं भ्राम्यते विश्वं योगिभिर्या विचिन्यते ।
यद्भासा भासते विश्वं सैका दुर्गा जगन्मयी ॥

अथर्वोवाच ॥

यां प्रपश्यंति देवेशीं भक्त्यानुग्राहिणो जनाः ।
तामाहुः परमं ब्रह्म दुर्गां भगवतीं मुने ॥

सूत उवाच ॥

श्रुतीरितं निशम्येत्थं व्यासः सत्यवतीसुतः ।
दुर्गां भगवतीं मेने परं ब्रह्मेति निश्चितं ॥

119. *vānarapratyāgamanam*, fol. 262*b*; 120. *hanūmantagarjanam*, fol. 264*a*; 121. *laṅkāvalokanam*, fol. 266*a*; 122. *laṅkānveshaṇam*, fol. 267*b*; 123. *avarodhadarśanam*, fol. 268*b*; 124. *sītopalambhanam*, fol. 271*a*; 125. *rākshasīsamādeśaḥ*, fol. 272*a*; 126. *sītāvilāpaḥ*, fol. 273*a*; 127. *svapnadarśanam*, fol. 274*a*; 128. *sītāsambodhanam*, fol. 275*b*; 129. *sītāpraśnaḥ*, fol. 276*b*; 130. *vanabhaṅgaḥ*, fol. 278*b*; 131. *kiṅkaravadhaḥ*, fol. 279*a*; 132. *amātyavadhaḥ*, fol. 280*a*; 133. *senāpativadhaḥ*, fol. 280*b*; 134. *akshakumāravadhaḥ*, fol. 281*b*; 135. *rāvaṇavākyam*, fol. 282*b*; 136. *pucchanirvāpaṇam*, fol. 285*b*; 137. *laṅkādāhaḥ*, fol. 286*a*; 138. *sītāsamāśvāsanam*, fol. 286*b*; 139. *hanumatkathanam*, fol. 289*a*; 140. *madhubhakshaṇam*, fol. 289*b*; 141. *sītāvākyam*, fol. 291*b*; 142. *sugrīvavākyam*, fol. 292*a*; 143. *senāniveśaḥ*, fol. 293*b*; 144–6. *vibhīshaṇavākyam*, foll. 294*b*, 295*b*, 296*b*; 147. *vibhīshaṇagamanam*, fol. 298*a*; 148. *setubandhaprārambhaḥ*, fol. 299*a*; 149. *setubandhanam*, fol. 299*b*; 150. *māyāmayarāmadarśanam*, fol. 301*b*; 151. *sītāpralāpaḥ*, fol. 306*b*; 152. *prahastavadhaḥ*, fol. 310*b*; 153. *sugrīvavigrahaḥ*, fol. 315*b*; 154. *kumbhakarṇavadhaḥ*, fol. 317*b*; 155. *narāntakavadhaḥ*, fol. 320*a*; 156. *triśīrshavadhaḥ*, fol. 320*b*; 157. *atikāyavadhaḥ*, fol. 322*a*; 158. *indrajid-yuddham*, fol. 324*b*; 159. *aushadhīnayanam*, fol. 325*b*; 160. *kumbhavadhaḥ*, fol. 326*b*; 161. *nikumbhavadhaḥ*, fol. 327*a*; 162. *makarākshavadhaḥ*, fol. 327*b*; 163. *māyāmayasītāvadhaḥ*, fol. 329*a*; 164. *indrajiddhomaḥ*, ib.; 165. *rāmotthāpanam*, fol. 320*a*; 166. *indrajiddarśanam*, fol. 331*a*; 167. *virathīkaraṇam*, fol. 333*a*; 168. *indrajid-vadhaḥ*, fol. 334*a*; 169. *vijayākhyāpanam*, fol. 334*a*; 170. *supārśvavākyam*, fol. 335*a*; 171. *paridevanam*, fol. 336*a*; 172. *virūpākshavadhaḥ*, fol. 337*b*; 173. *mahāpārśvavadhaḥ*, fol. 338*b*; 174. *śaktibhedaḥ*; 175. (*rāmarāvaṇayuddham* B, fol. 344*b*; 176. *rāvaṇaśiraśchedaḥ* B, fol. 346*b*; 177. *vibhīshaṇābhishekaḥ* B, fol. 348*a*; 178. *vimārārohaṇam* B, fol. 349*b*; lacuna in A between foll. 340 and 341, from B 344*a*, l. 10 to 351*a*, l. 12); 179. *ayodhyārāmapraveśaḥ*, fol. 341*b*; 180. *rāmābhishekaḥ*, fol. 342*a*; 181. *rājyavarṇanam*, running thus:

स्वराज्यमखिलं प्राप्य रामो धातृसनातनः ।
अयजच्चाश्वमेधेन तथा बहुसुवर्णकैः ।
अन्यैश्च बहुभिर्यज्ञै रामः[1] प्रचुरदक्षिणैः ॥

आजानुबाहुः सुमुखो वृषस्कन्धो महाद्युतिः ।
कंबुग्रीवः पृथुयशाः पृथिवीमनुपालयन् ॥

ततो रामस्य धर्मात्मा राज्यं प्राप्य तथा जनः(धनः B)।
ईजे यज्ञैर्बहुविधैः सहस्रशतदक्षिणैः ॥

न कस्यचिद्भयं तत्र न च व्यालकृतं भयं ।
न चैव विधवा नार्यो न व्याला नैव तस्कराः[2] ॥

न च स्म वृद्धो बालानां प्रेतकार्यं करोति च ।
सर्वे प्रमुदिता देवाः सर्वे धर्मपरा जनाः ॥

दश वर्षसहस्राणि जीवंति सुखिनो नराः ।
नित्यं पुष्पफला वृक्षा नित्यं क्षीरमृतागवाः[3] ॥

काले वर्षति पर्जन्यः सुखस्पर्शनमारुतः ।
स्वकर्मस्वनुवर्तंते वर्णानां सत्यभाषिणः(°भाषणं B) ॥

दश वर्षसहस्राणि दश वर्षशतानि च ।
सपुत्रधनधान्यं च[4] लब्ध्वा राज्यमकंटकं ।
निरामयो(?°यं) वीतशोको(?°कं) रामो राज्यमकारयत् ॥

आदिकांडमिदं त्वार्षं वशिष्ठेन प्रदर्शितं ।
यथा मरीचेरग्निस्तु पूर्वं रामाय वै(सर्वं रामायणं B) पुरा ॥

यः शृणोत्येकचित्तेन सर्वपापैः प्रमुच्यते ।
किं तीर्थैर्गोप्रदानैश्च किं यज्ञैः किमु पोषणैः[5] ।
अहन्यहनि रामस्य चरितं शृण्वतो नृप ॥

शृण्वन्निदं यः कुरुते हि यात्रां
तस्यार्थसिद्धिः पुनरागमं च ।
लोकद्वयं साधयते तथा हि
संवर्धिता तस्य भवेत्सुविद्या ॥

---

[1] अश्वमेधैस्त्रिभिर्यज्ञै रामः B. [2] न व्याला न मरीसृपाः B.
[3] क्षीरघटश्रवाः B; ? गावः क्षीरघटस्रवाः ।
[4] पुत्रान्धनं च धान्यं च B. [5] पोषितैः B.

श्लोकं तदर्धार्धमथोपशृण्वन्
सर्वाणि पापानि निहंति सम्यक् ।
पात्रे तिलानां भवतीह (यच्च B)
शृण्वन्प्रदत्ते ऽनुदिनं लभेत ॥
आरोग्यमायुष्यकरं यशस्यं सौभावकं[1] बुद्धिविवर्धनं च ।
श्रोतव्यमंतर्नियतैर्महद्भिराख्यानमूर्जस्करवृद्धिकामैः[2] ।
कुटुंबवृद्धिं धनधान्यवृद्धिं लभेत लक्ष्मीं विपुलां नरोत्तमः[3] ॥

Then follows a brief *anukramaṇikā*, ending with a few corrupt verses commending the study of this work; after which the colophon: इत्याद्ये वह्निपुराणे आख्यानशतकीर्तनो नामाध्यायः समाप्तः ॥ समाप्तमिदं पुराणमाग्नेयम् ॥ संवत् १६४६ वर्षे अश्वनि सुदि विज्ञै दशमी बुधवासरे। आगरैनगरे श्रीअकबरसाहिजलालदी महमदराज्ये ॥ ग्रंथसंख्या १४००० ॥

The leaves are throughout marked अग्नि० or अग्निपु०. [H. T. Colebrooke.]

3583.

1001. Foll. 353 (counted 354; no. 129 being passed over); size 12½ in. by 5¾ in.; fairly written, in Devanāgarī, at Benares, in Saṃvat 1861 (A.D. 1804); 12 or 13 lines in a page.

Vahnipurāṇa. [B.]

[H. T. Colebrooke.]

3584.

241. Foll. 170; size 12½ in. by 6 in.; indifferent Devanāgarī writing of 1805 A.D.; twelve lines in a page.

Vāmanapurāṇa.

It begins:

पुलस्त्यमृषिमासीनमाश्रमे वाग्विदां वरः ।
नारदः परिपप्रच्छ पुराणं वामनाश्रयं ॥ ०

For an analysis of the work, for which the present MSS. were collated, see Aufrecht, Cat. Bodl., no. 102. Cf. also Rāj. Mitra, Notices, iii., p. 267.

It ends:

तस्मात्पूज्यो नमस्कार्यैः सततं भक्तितत्परैः ।
श्रवणाद्विष्णुसदनं कोटियज्ञफलं लभेत् ॥
इदं पुराणमखिलं पुलस्त्येन च भाषितं ।
यः शृणोति नरो भक्त्या विष्णुलोकं स गच्छति ॥
इति श्रीवामनपुराणं संपूर्णं ० ॥

[H. T. Colebrooke.]

3585.

400. Foll. 208 (counted 206; nos. 16, 143–45 being double, and nos. 98 & 164 passed over); size 12¼ in. by 6¼ in.; good, large, modern Devanāgarī writing; twelve lines in a page.

Vāmanapurāṇa.

It begins:

त्रैलोक्यराज्यमाच्छिद्य बलेरिन्द्राय यो ददौ ।
नमस्तस्मै सुरेशाय सदा वामनरूपिणे ॥
पुलस्त्य ऋषिमासीन ०

[H. T. Colebrooke.]

3586.

2678d. Foll. 9; size quarto, 10 in. by 7¾ in.; indifferent, cursive Telugu writing; 23–26 lines in a page; European paper (watermark 1799).

Three chapters (*adhyāyas* XXXI. — XXXIV.) claiming to form part of the (*Kauśikapulastya-saṃvāda* of the) *uttarabhāga* of the *Vāmana-purāṇa*.

A. XXXI. (*Kalyāṇapurī-māhātmya*) begins: मुनयः ॥
व्यासो वशिष्ठः कपिलो विश्वामित्रो महातपाः ।
नारदोऽथ भरद्वाजो वामदेवः शुकस्तथा ॥

---

[1] सौभ्रातृकं B.
[2] ? Thus B; शृतं नरैर्नियतैर्मरुद्भिरा० A.
[3] इति श्रीवह्निपुराणे रामराज्यवर्णनं समाप्तं ॥ B.

पराशरो ऽथ भगवान् अगस्त्यो मुनिसत्तमः ।
मार्कंडेयो ऋषिश्रृंगः कुणिर्मुनिवरः कुशः ॥ °

Colophon: इति श्रीवामनपुराणे उत्तरभागे कल्याणपुरीमाहात्म्यं नाम येकत्रिंशो ऽध्यायः ॥

A. XXXII. begins (fol. 3*a*):

अथ रात्र्यां व्यतीतायां पुरस्कृत्य तु गालवं ।
द्विजास्ते सह कन्याभिः जग्मुर्वा मगवीं प्रति ॥ °

Colophon: इति वामनपुराणे कौशिकपुलस्त्यसंवादे वराहअचैनो(?) नाम द्वात्रिंशो ऽध्यायः ॥

A. XXXIII. (*Jñānopadeśakathanam*) begins (fol. 6*b*):

एवं तु ब्रुवतां ब्रह्मान्(!) ऋषीणां भावितात्मनां ।
गालवो ऽपि कथां श्रुत्वा परां विस्मयमागतः ॥

Colophon: इति श्रीवा° कौ° ज्ञानोपदेशकथनं नाम त्रयस्त्रिंशो ऽध्यायः ॥

A. XXXIV. (*Varāhamāhātmya*) begins (fol. 7*b*):

अथोवाच मुनिं ब्रह्मा सर्वेषां शृणवतां पुनः ।
धान्या यूयं महाभागा यतः साक्षाद्वसुंधरा ॥

दुहितृत्वेन युष्माकमवतीर्णा महीतलं ।
एवं जामातृभावेन येवोप्येष(? स्ये° or एवोऽप्येष) जनार्दनः॥

तप्तं तपः पुरा दिव्यं भवद्भिर्बहुवत्सरान् ।
जन्मांतरे हि श्रीपुर्यामस्यामेवे(°च) चिरं पुरा ॥

It ends:

इदं पठंति ये नित्यं संनिधौ भक्तिसंयुताः ।
ज्ञानदातुर्वराहस्य कल्याणं प्राप्नुवंति ये(*r.* ते) ॥

चैत्रे मासि शुभे चैता श्रवणनक्षत्रविशेषतः(!) ।
ये पठंति वराहस्य संनिधौ भक्तिसंयुताः ॥

ते कीर्तिसंपदारोग्यपशुक्षेत्रगृहाणि च ।
पुत्रमित्रकलत्रार्थी(? °र्थान्) प्राप्य कल्याणमीदृशं ॥

अलभ्यं ब्रह्मबुधेंद्र(? रुद्रेंद्र)सुरैर्मुनिगणैरपि ।
पदं प्राप्य हि मोदंते सूरिभिः पूजिता भृशं ॥

इदं पुलस्त्यकथितं ॥

इति श्रीवामनपुराणे कौशिकपुलस्त्यसंवादे वराहमाहात्म्ये चतुस्त्रिंशो ऽध्यायः ॥

In the (English) list of contents on the fly-leaf of the volume these four chapters are included under the title *Tiruvindi*(*Teeroovindee*)-*Sthalapurāṇa*, which is also written, in Telugu, by a different hand, at the top of fol. 1.

[MACKENZIE COLLECTION.]

3587.

1869. Foll. 396 (counted 398; nos. 182 & 245 being passed over); size 11½ in. by 5 in.; good Devanāgarī writing of about 1600 A.D.; 10 or 11 lines in a page.

Vāyupurāṇa, in two *khaṇḍas*, or four *pādas*. [A.]

The MS. corresponds pretty closely to the text as edited, by Rājendralāla Mitra, in the Bibl. Ind.:—

1. *Prakriyāpāda* (*kh.* I., *adhy.* 1–6): begins:

प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययं ।
महादेवं महात्मानं सर्वस्य जगतः पतिं ॥

2. *Anushaṅgapāda* (*kh.* I., *adhy.* 7–61; II., 1–3) begins, fol. 22*a*: सूत उवाच ॥

इत्येष प्रथमः पादः प्रक्रियायाः प्रकीर्तितः ।
श्रुत्वा तु संहृष्टमनाः काश्यपेयः सनातनः ।
संबोध्य सूतं वचसा पप्रच्छाथोत्तरां कथां ॥

It is actually called '*anushaṅgapāda*' in the colophons of *adhy.* i. 40 (fol. 127*b*), 51 (171*a*), 53 (181*a*); and ii. 3 (fol. 231*b*).

Khaṇḍa I. ends, fol. 220*a*: इति श्रीवायुप्रोक्ते प्रजापतिवंशानुकीर्तनं समाप्तं प्रथमं खंडं ॥

3. *Upodghātapāda* (*kh.* II., *adhy.* 4–37) begins, fol. 231*b*: ऋषय ऊचुः ॥

श्रुत्वा पादं द्वितीयं तु क्रांतं सूतेन धीमता ।
अतस्तृतीयं पप्रच्छ पादं वै शांशपायनः ॥

पादः क्रांतो द्वितीयो ऽयमनुषंगेण यत्त्वया ।
तृतीयं विस्तरात्पादं सोपोद्घातं प्रकीर्तय ॥

It is actually called '*upodghātapāda*' in the colophons of ii. 4 (fol. 238*a*), 8 (251*b*), 9 (255*b*), 10 (258*b*), 27 (309*b*), 28 (311*b*); whilst ii. 37 ends (fol. 367*a*) with the colophon: इति श्रीवायुपुराणे अनुषंगपादस्तृतीयः(!), thus agreeing in this respect with the edition.

4. *Upasaṃhārapāda* (*kh.* II., *adhy.* 38–41) begins, fol. 367*a*:

श्रुत्वा पादं तृतीयं तु क्रांतं सूतेन धीमता ।
ततश्चतुर्थं पप्रच्छुः पादं वै ऋषिसत्तमाः ॥

ऋषय ऊचुः ॥

पादः क्रांतस्तृतीयो ऽयमनुषंगेण यस्त्वया ।
चतुर्थं विस्तरात्पादं संहारं परिकीर्तयः ॥ ० ॥ ० ॥

सूत उवाच ॥

भवतां कथयिष्यामि सर्वमेतद्यथातथं ।
पादं त्विमं ससंहारं चतुर्थं मुनिसत्तमाः ॥

It is actually called '*upasaṃhārapāda*' in in the colophon of ii. 40 (fol. 395*a*); and in the last *adhyāya* we read (fol. 397*a*; ed. p. 554):

प्रक्रिया प्रथमः पादः कथावस्तुपरिग्रहः ।
अनुषंग उपोद्घात उपसंहार एव च ॥

एवमेतच्चतुष्पादं पुराणं लोकसंमतं ।
उवाच भगवान् साक्षाद्वायुर्लोकहिते रतः ॥

The colophon of ii. 14 runs thus (269*b*): इत्यादिवायुप्रोक्तायां संहितायां आद्यकल्पे द्वादशो ऽध्यायः ॥

This MS. does not contain the *adhy.* ii. 42 (*vyāsasaṃśayāpanodanam*) with which the *Vāyupurāṇa* proper ends in the edition (where it is followed by the *Gayāmāhātmyam*, for which see nos. 3593–95).

For an analysis of the work see Aufrecht, Cat. Bodl., nos. 103-4; and, for a general account, H. H. Wilson, Essays, i., p. 140 seqq.

There are several omissions in the MS., the most serious occurring fol. 241*b*, l. 2, where the text from ii. 5, *śl.* 77*b* to 8, *śl.* 125 has been omitted.

It ends:

तं देवदेवं जनानां यज्ञात्मकं सत्यलोकप्रतिष्ठितं(!) ।
वरं वराणां वरदं महेश्वरं ब्राह्मणमादिं(*r.* ब्रह्म०) प्रयतो
[नमस्ये ॥

इति श्रीमहापुराणे वायुप्रोक्ते द्वादशसाहस्र्यां संहितायां ब्रह्मांडावत्तैं समाप्तं ॥ प्रक्रियापादग्रंथ ४८०० अनुषंगपाद ३६०० उपोद्घातपाद २४०० उपसंहारपाद १२०० [after which, on last page, very much faded] एवं सर्वसंख्या १२००० षष्टत्रिफणीशतानि (षष्ट्यधिकत्रीणि शतानि MS. C) अंको गणनीयः ॥ उपसंहारपादे कलियुगप्रमाण ४३२००० उपोद्घातपादो द्वापर ८६४००० अनुषंगपादे त्रेतायुग १२९६००० प्रक्रियापादे कृतयुगप्रमाणं १७२८००० इदं पुराणं चतुर्युगप्रमाणं समाप्तं वायुपुराणं ॥

On an additional leaf a later hand has reproduced (not always correctly) the calculations of the last page: एवं सर्वसंख्या १२००० षटत्रिकलिमतानि अकोणनीयः ॥ ० After which yet another hand has added the statement: इदं विनायकज्योतिर्विदस्य पुस्तकं ॥

[Dr. John Taylor.]

3588, 3589.

2102, 2103. Foll. 359, now bound up together (no. 167 was omitted in the pagination, whilst no. 280 is double); size 9¾ in. by 7 in.; good, clear Devanāgarī writing, dated Saṃvat 1540 (1483 A.D.); 11–14 lines in a page.

Vāyupurāṇa. [B.]

Five or six different hands seem to have been engaged in writing, and afterwards supplementing, this manuscript. The bulk of the MS. was written by four different scribes of much the same age; whilst foll. 1–36, 49–62, and 280 (two lines) were afterwards supplied by two (perhaps three) different hands.

Kāṇḍa I. ends fol. 177*b*.

Pāda 1, fol. 17*a*: इति श्रीमहापुराणे वायुप्रोक्ते प्रक्रियापादः ॥

P. 2, fol. 188*a*: वायुपुराणे अनुषंगपादे ॥

P. 3, fol. 320*a*: इति श्रीवायुपुराणे वायुप्रोक्ते अनुषंग-पादस्तृतीयः(!) ॥ (but fol. 218*a*: इति श्रीवायुपुराणे उपोद्घाते काश्यपीयो वंशः ॥).

P. 4, fol. 359*a* (after the final, slightly less corrupt, verses): °ब्रह्माणमादिं प्रणतो नमस्ये ॥ इति श्रीमहापुराणे वायुप्रोक्ते द्वादशसाहस्र्यां संहितायां ब्रह्मांडावत्तं समाप्तं ॥ संवत् १५४० वर्षे फाल्गुनमासे कृष्णपक्षे [एकादश्यां तिथौ रविवारे २ ॥ suppl.] व्यासहीरासुतेन नारायणेन लिखितमिदं वायुपुराणं ॥ The calculations given at the end of MS. A are here omitted.

That there is some connection between this and the preceding MS. is evident, but whether this was the original MS. from which the other was copied, or whether both were derived from an older MS. containing the same number of leaves, is not clear. This MS. is, however, less easy of reference. That Colebrooke read it carefully is evident from occasional notes of his in the margin, marking matters of interest. [H. T. Colebrooke.]

3590.

1310. Foll. 320 (counted 329; nos. 256–65 being passed over, and no. 216 being double); size 13 in. by 6½ in.; clear, modern Devanāgarī writing; twelve lines in a page.

Vāyupurāṇa. [C.]

The four *pādas* end on fol. 19*a*, 179*b*, 303*a*, 328*a* respectively. Omissions and transpositions occur sometimes in this MS. occupying the space of several lines, and even pages, in the other MSS.

A mistake which had been made in counting between foll. 298 and 300 a leaf which ought to have been fol. 294 has been rectified by its being restored to its proper place.

[H. T. Colebrooke.]

3591.

264b. Foll. 272; size 12½ in. by 4½ in.; Devanāgarī writing of 1800 A.D.; 10–12 lines in a page.

Vāyupurāṇa. [D.]

Carelessly copied (for one *Harivaṃśa Mahendra Ṭhākur*) from MS. A.

[H. T. Colebrooke.]

3592.

1737. Foll. 36; size 9⅛ in. by 4 in.; good Devanāgarī writing of 1799 A.D.; nine lines in a page.

Gayāmāhātmya, a work in eight *adhyāyas,* attached to the *Vāyupurāṇa,* and treating of the sacred places of Gayā, and the rites to be performed by those visiting them. [A.]

The work has been repeatedly published in India: *e.g.* by *Tāranātha Tarkavāchaspati,* Calc. 1864 and (with a Bengālī translation) 1866; and in the Bibl. Ind. edition of the *Vāyupurāṇa,* it forms *adhyāyas* 43–50 of the *Uttarakhaṇḍa.* Cf. Aufrecht, Cat. Bodl., p. 67.

The MS. (which is not very correct) begins: सूत उवाच ॥

सनकाद्यैर्महाभागैर्देवर्षिः सह नारदः ।
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्वकं ॥ °

[H. T. Colebrooke.]

3593.

2707. Foll. 39; size 8¾ in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

The same work. [B.]

This rather incorrect MS., which offers numerous variations from the text of A, begins by omitting the second line of verse 1.

[Mackenzie Collection.]

3594.

2903. Foll. 39; size 9¼ in. by 5 in.; fairly good Devanāgarī writing of 1805 A.D.; 10–12 lines in a page.

Gayāmāhātmya.

It begins: सूत उवाच ॥ शौनकाद्यैर्महाभागैर्देवर्षिसह नारदः । ० [Dr. Leyden.]

3595.

2792. Foll. 699 (counted 691; nos. 336–338 being omitted, and 377–386 & 425 used twice); size 11¼ in. by 5½ in.; good, clear Devanāgarī writing of 1610 A.D.; 11–13 lines in a page.

Revāmāhātmya or *Narmadāmāhātmya*, professing to be a section (the *Revākhaṇḍa*) of the *Uttarakhaṇḍa* of the *Vāyupurāṇa*. [A.]

It begins:

उभयतटतीर्थो प्रक्षालितसकललोकदुरितौघा ।
देवमुनिमनुजवंद्या हरतु सदा नर्मदा दुरितं ॥ ०

See Aufrecht, Cat. Bodl., nos. 114–16. To the full description there given may be added a few more names, and some various readings offered by our manuscripts:—

Oxf., p. 66*a*, l. 24, add *vimaleśvaratīrtham* (fol. 208*b*), *ulūkahradatīrtham* (fol. 209*b*), *pushkariṇītīrtham* (fol. 210*a*); l. 25, add *bhīmakulyāsaṃgameśvaratīrtham* (fol. 216*a*), *mārkaṇḍeśvaratīrtham* (fol. 216*b*), and *pishpaleśvara* (thus generally for *pippal.*, fol. 217*a*); l. 26, *karoṭīśvaratīrtham* (fol. 220*a*) for *karoṭeśvara*; l. 43, add *apsarohradatīrtham* (fol. 306*a*).

Page 66*b*, l. 7, *badarikāśramatīrtham* (fol. 351*b*) for *badarikeśvara*; l. 17, *dhanadeśvaratīrtham*, also (*lokabhāshayā*) called *bhāṇḍāgārikatīrtham* (fol. 396*a*) and *rohiṇīśvara* (fol. 398*a*) for *rauhiṇeśvara*; l. 28, *kohaneśvaratīrtham* (fol. 435*a*) for *kohaleśvara*; l. 33, *ayonisambhavatīrtham* (fol. 451*a*) for *ayonijatīrtham*, and *piṅgaleśvara* for *kapileśvara*; l. 35, add another *mārkaṇḍeśvaratīrtham* (fol. 457*b*).

Page 67*a*, l. 3, *kusumāyudheśvaratīrtham* (fol. 493*b*) for *kusumeśvara* (which, however, is used once for metrical reasons); l. 14, *audumbarīsaṃgame* (and *audumbarīśvara*, fol. 523*a*, *b*) for *kudumbarīs* (MS. 980, *adambarī*); l. 36 (here fol. 605*b* as in Oxf. MS.), *gonāgonīśvaratīrtham*, doubtless the Gondagaon (? and the district Gondvānā) of our maps.

Page 67*b*, l. 3, n., the colophon has *bhaḍahaḍīmātṛitīrtham* (fol. 635*a*); l. 4, A has once *kuharītīrtham* (fol. 635*a*), doubtless a slip for *kururītīrtham*, as it otherwise reads, and as B does throughout; l. 7, *suṇḍīśvara* (foll. 652*a*, 654*a*) throughout for *muṇḍīśvara*; l. 10, *āshāḍhīśvaratīrtham* (fol. 658*a*) instead of *ākhāṭīśvara*; l. 25, for Oonkan Mandata other maps give Omcar Mundatta, Umkarjee Maharaj, and (on a Hindī map of Hindusthān) Omkāranātha. The first two forms would seem to stand for Omkāramahānātha.

The Narmadā is praised for having survived uninjured the whole of the seven *kalpas*, while all the other rivers and oceans underwent destruction in each *kalpa*. The names of these rivers are enumerated in the following verses (fol. 7*a*):

जाह्नवी सरितां श्रेष्ठा तथा चैव सरस्वती ।
कावेरी देविका भद्रा सिंधुः शालकुटी तथा ॥
सरयूः शतरुद्रा च चन्द्रभागेश्वरी तथा ।
गोदावरी महेन्द्रा च पयोष्णी यमुना नदी ॥
शिप्रा शतद्रू वैदर्भी तथा चर्मण्वती इरा ।
एताश्चान्याः सरिच्छ्रेष्ठाः सर्वपापहराः शुभाः ॥

We further extract the following list of names of our river (the southern Gaṅgā):

एषा गंगा महापुण्या त्रिषु लोकेषु विश्रुता ।
स्रोतोभिः पंचदशभिः पावयंती दिशो दश ।
शृणु तानि महाभाग वक्ष्यामि नृपसत्तम ॥

शोणो महानदश्चैव नर्मदा सुरसत्तम ।
मंदाकिनी महापुण्या त्रिकूटा विमला तथा ॥

चित्रोत्पला विपापा च रजनी वालुवाहिनी ।
महार्णवा[1] विपाशा च रेवा च करभा तथा ॥

ऋष्यापादप्रसूताश्च (? ऋश्यपाद°) सर्वा वै रुद्रसंभवाः ।
सर्वपापहरी (°राः) पुण्याः सर्वा मंगलदाः शिवाः ॥

इत्येतैर्नामभिर्दिव्यैः श्रूयते वेदपारगैः ।
पुराणज्ञैर्महाभागैराज्यपैः सोमपैस्तथा ॥

इत्येतत्सर्वमाख्यातं महाभाग्यं नृपोत्तम ।
मनुनोक्तं पुरा मह्यममृतायाः समुद्भवं ॥

पुण्यं पवित्रमतुलं रुद्रोद्गीतमिदं शुभं ।
ये नराः कीर्तयंत्यत्र भक्त्या शृण्वंति चैव ये ॥

प्रातरुत्थाय नाम्नां हि कलापं दशपंचकं ।
ते नराः सकलं पुण्यं लप्स्यंते ह्यवगाहजं ॥ fol. 12*a*.

किमर्थं नर्मदा प्रोक्ता रेवेति च कथं तु सा ।
त्रिकूटा च किमर्थं सा किमर्थं वालुवाहिनी ॥

कोटितीर्थसमायुक्ता प्रविष्टा या महार्णवं ।
कियंत्यः सरितस्तात नर्मदां समुपासते ॥

यज्ञोपवीतैर्ऋषिभिर्देवताभिस्तथैव च ।
विभक्तेयं किमर्थं च श्रूयते मुनिसत्तम ॥

धिष्णीति च पुराणज्ञैः किमर्थं प्रोच्यते ऽनघ ।
केषु स्थानेषु तीर्थेषु पूजनीया सरिद्वरा ॥ fol. 12*b*.

Besides these, a number of other rivers are mentioned throughout the book as more closely connected with the Narmadā, such as: Kapilā (foll. 54*a*, 93*a*), Viśalyā (foll. 56*a*–58*a*), Nīlagaṅgā (fol. 57*a*), Jvālā (fol. 72*b*), Kāverī (fol. 75*b*), Vārāhī (ib.), Caṇḍavegā (fol. 78*a*), Eraṇḍī (fol. 79*a*), Kubjā (fol. 117*b*), Hiraṇyagarbhā (fol. 118*b*), Vāgu (fol. 119*b*), Sarasvatī (fol. 121*a*), Pushkariṇī (fol. 169*a*), Anaḍvāhī (fol. 232*a*), Aśvaparṇī (fol. 285*a*), Uri (*revori-saṃgame*, foll. 324*a bis*, 324*b*, 328 *bis*; *uripravāha*, fol. 326*a*), Karañjā and Karajā (fol. 380*b*).

It ends:

धर्माख्यानमिदं पुण्यं सर्वाख्यानेष्वनुत्तमं ।
गृहे ऽपि विद्यते (पठ्यते B) यस्य चातुर्वर्ण्यस्य सत्तमाः ॥

धन्यं तस्य गृहं मन्ये गृहस्थं चापि तत्कुलं ।
पूजयन् पुस्तके येषु (पुस्तकं पूजयेद्यस्य B) नर्मदाचरितस्य
नर्मदा पूजिता तेन भगवांश्च महेश्वरः । [तु ॥
वाचके पूजिते तद्वद् देवाश्च ऋषयो ऽर्चिताः ॥

लिखापयित्वा (लेखयित्वा च B) सकलं रेवाचरितमुत्तमं ।
भूषणं सर्वशास्त्राणां यो ददाति द्विजन्मने ॥

नर्मदासर्वतीर्थेषु महापुण्यफलप्रदं[2] ।
स्वर्गेदं पुत्रदं पत्यं यशस्यं (पुत्रदं धन्यं यत्रास्यं B) कीर्ति- [वर्धनं ॥

धन्यमायुष्यमतुलं (धर्मा° B) दुःखदुःस्वप्ननाशनं ।
पठतां शृण्वतां चापि सर्वकामार्थसिद्धिदं ॥

यत्प्रदत्तमिदं पुण्यं पुराणं वाच्यते द्विजैः ।
शिवलोके स्थितस्तस्य पुराणाक्षरवत्सरी ॥

इति निगदितमेतन्नर्मदायाश्चरित्रं
पवनगदितमग्र्यं (यदनिगदित° B) शर्ववक्त्रादवाप्य ।
त्रिभुवन[जन]वंद्यं यत्तदादौ (त्वेतदादौ B) मुनीनां
कुलपतिकुलतो (°पुरतः सन् B) सूतमुख्येन साधु ॥

इति श्रीवायूक्तचतुर्विंशतिसाहस्र्यां संहितायामुत्तरखंडे श्रीनर्मदामाहात्म्ये पुराणपरिसमाप्तिर्नामाध्यायः ॥

पंचदश सहस्राणि खण्डे ऽस्मिन् मुनिना पुरा ।
ग्रन्थसंख्या निगदिता माहात्म्ये नार्मदे किल ॥

तीर्थमोंकारमारभ्य तीर्थान्येकार्णवावधि ।
चतुःशतानि मुख्यानि तथैवान्यानि कोटिशः ।
गुप्तप्रकटरूपाणि दिव्यभौमानि संख्यया ॥

इति श्रीवायुपुराणं शिवापराद्धर्यं समाप्तं ॥

[1] यस्मान्महार्णवे घोरे दृश्यते महती सरित् । महार्णवेति सा प्रोक्ता तेनेयं नृपसत्तम ॥ तप्यतस्तस्य देवस्य शूलाग्राद्विंदवो ऽपतन् । शोणाः शोणाभिधानेन दशार्णो देशसंज्ञया ॥ कृपां करोति सा यस्माल्लोकानामभयप्रदा । संसारार्णवमग्नानां तेन नाम्ना कृपा स्मृता ॥ ° भ्रामयंती दिशः सर्वा वारिपूरेण वेगता । श्रावयंती विराजंती तेन रेवा निगद्यते ॥ ° यस्माद्रंजयते लोकान् दर्शनादेव भारत । रजनी तेन सा प्रोक्ता पुराणज्ञैर्नृपोत्तम ॥ foll. 16*b*, 17*a*.

[2] For this line B has: नर्मदासर्वतीर्थेषु स्नानदानेन यत्फलं । तत्फलं समवाप्नोति स नरो नात्र संशयः । एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदं ॥

स्वस्ति श्रीपातशाहा श्रीशलेमशाहवि[ज]यराज्ये संवत् १६६७ वर्षे शाके १५३२ प्रवर्तमाने दक्षिणायनगते श्रीसूर्ये वृषराशौ महामांगल्यदश्रावणमासे शुक्लपक्षे द्वितीयायां तिथौ गुरुवारे वास्तव्यं अवंतीक्षेत्रमध्ये श्रीरामचंद्रसन्निधौ श्रीऔदीच्यज्ञाते-(०तीय)महिता श्रीराअल(०वल)सुतमहिता कल्याण लिखितमिदं पुस्तकं ॥

सारस्वतज्ञाते परोत श्रीवालु तस्य सुत परोत श्रीद्वारकादाशः तस्य भार्त्रे परोत वेणी तस्य भार्त्रे परोत काशीः परोत द्वारकादाश नु पुत्र परोत राघवदासः परोत श्रीवेणी वेणी तस्य पुत्र ३ प्रथम परोत श्रीरामः शंकरः गंगाधरः। परोत श्रीकाशीदास तस्य पुत्र परोत श्रीविश्वनाथः ॥ रेवामाहात्म्यं परोपकृतये स च श्रीओंकारप्रसादात् चिरं तिष्ठतु ॥ ० ॥

Then added by a later hand: संवत् १६९० वर्षे मास चैत्र शुदी १२ भौमे -- भवानीशंकरसांनिध्यसन्नोदी. कृष्णस्येदं पुस्तकं ॥

Cf. also Rāj. Mitra, Notices, vii., p. 21 seqq., where the work is called *Śivasaṃhitā* (cp. colophon of next MS.). [Coll. of Fort William.]

3596.

980. Foll. 358; size 14¾ in. by 7¼ in.; good, modern Devanāgarī writing; thirteen lines in a page.

Revāmāhātmya. [B.]

With the exception of a few trifling differences noted in their proper places before, it throughout confirms the different readings quoted from MS. A.

Colophon: इति श्रीवायूक्तचतुर्विंशतिसाहस्र्यां शिवसंहितायां उत्तरखंडे श्रीनर्मदामाहात्म्ये पुराणपरिमाणनिर्णयाध्यायः॥ इति वायुपुराणं शिवापराह्वयं समाप्तम् ॥

[H. T. Colebrooke.]

3597.

1301b. Foll. 7; size 13½ in. by 6¼ in.; large, clear, modern Devanāgarī writing; ten lines in a page.

Fragment of the *Revāmāhātmya*, comprising the first 3 *adhyāyas* and the beginning of the 4th, and containing the well-known enumeration and description of the *Purāṇas*. Cf. Wilson, *Vishṇup.*, 2nd ed., i., p. xxiv., note.

[H. T. Colebrooke.]

3598.

856a. Foll. 79 (and a second leaf numbered 45); size 12½ in. by 5 in.; careless Devanāgarī writing of 1789 A.D.; 12 or 13 lines in a page.

Māghamāhātmya, a section of the *Vāyupurāṇa*, in 30 *adhyāyas*.

It begins: नारद उवाच ॥

संसारे क्लिश्यमानानां जन्तूनां पापकारिणां ।
कर्मणा भ्राम्यमाणानां का गतिः कमलोद्भव ॥ १ ॥

सुखमिच्छन्ति ते मूढाः नेच्छन्ति सुखकारणं ।
नेच्छन्ति दुःखलेशं वा तद्धेतौ सततं यताः ॥ २ ॥

अलसा विमुखा धर्माद्विषयासक्तचेतसः ।
तेषां मुक्तिः कथं ब्रह्मन् कथं धर्मे रतिर्भवेत् ॥ ३ ॥

कृपाविष्टेन चित्तेन नरानेतान्समुद्धरन् ।
धर्मादुपेत्य वचसा विष्णुभक्तिविवर्धिना ॥ ४ ॥

वह्निमादातुकामानां बालानां मातरो यथा ।
निवर्तयित्वा सुरुचिं जनयंति फले(*r.* फलं) यथा ॥ ५ ॥

तथा भागवता लोके साधवः समदर्शिनः ।
निवर्तयित्वा बोधेन विषयानलमिच्छतः ॥ ६ ॥

जंतून् धर्मफलं तेषां दर्शयंति हितेच्छया ।
पितरो मातरो ज्ञानं शास्तारः साधवो नृणां ॥ ७ ॥

त्वमादिवक्ता धर्माणां त्वं सर्वं वेत्सि तत्त्वतः ।
कर्मणा केन कालुष्ये मनसो गच्छति द्रुतं ॥ ८ ॥

धर्मास्तु बहवः संति श्रुतिस्मृत्युदिता अपि ।
ते धर्माः कष्टसाध्या हि तेष्वादौ विमुखा नराः ।
वद धर्मं सुखोपास्यं सर्वबंधविनाशनं ॥ ९ ॥

यत्कुर्वतो ऽपैति समस्तबंधो
ऽजायत श्रद्धा मतिरास्तिकी च ।
भक्तिर्हरौ तत्पुरुषेषु सख्यं
तदेव तेषां हितकाम्यया वद ॥ १० ॥

इति तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः
संप्रहृष्टमना भूत्वा नारदं वाक्यमब्रवीत् ॥ ११ ॥

The answer to *Nārada's* question is an injunction to perform ablutions, especially in the month of *Māgha*, and the details of this ceremony are then fully expounded in *adhyāyas* I. and II. The benefit to be derived therefrom is then illustrated by a series of legends, viz.: III., IV. Legend of *Rocishmatī*, daughter of *Sudharma*, whose husband is resuscitated by the effect of the *Māghasnāna*. V. The *Guhyaka Śveta*, who had been changed into a snake by the curse of the *Muni Romaśa*, is delivered therefrom by this performance. VI., VII. Precepts regarding auspicious days and places. VIII. Legend of *Bhadra* and *Subhadra*, the sons of the *Śūdra Śatabali*. IX. Of *Paridhi*, the disciple of the *Ṛishi Pragādha*. X., XI. Of *Suyajña*, the disciple of the *Ṛishis Jābāli* and *Śāṇḍilya*, receiving the confessions of seven *Piśācas* who, having chased him about, are overcome by him after he had performed his ablutions in the river Kauśikā. XII., XIII. Similar legends of the seven *Kushmāṇḍas*, and the demons collectively called *Ḍākinīgaṇa*. XIV. Of *Tuṇḍila*, *Ūrmila*, the three *Kadambagāḥ* (or *Gṛidhraśirasaḥ*), and the two *Audumbarāśrayau*. XV. Wonderful phenomena happening at their conversion through *Suyajña*. *Śāṇḍilya* in search of his pupil. Interrogated by these penitents, he reveals to them the true mode of *Vishṇu* worship, which subject is continued to the end of *adhyāya* XXIV. XXV.–XXX. The same subject, enlarged upon by the *Muni Gālava*.

It ends:

श्रुत्वा शास्त्रं सकृद्वापि पुनर्मातुः पयोरसं ।
बहुकर्मकरो वापि न पिवत्येव निश्चयः(०यं) ॥
पुत्रार्थी विद्यते(विंदते) पुत्रान् धनार्थी धनमाप्नुते ।
किमत्र बहुनोक्तेन मोक्षार्थी मोक्षमाप्नुयात् ॥
इति श्रुत्वा शौनकाद्या माघमाहात्म्यमुत्तमं ।
संतोषमतुलं प्रापुर्विस्मयोत्फुल्ललोचनाः ।
सूतं पौराणिकं ते तु प्रजयामासुरंजसाः(? ज्ञापया०) ॥
इति श्रीवायुपुराणे माघमाहात्म्ये ब्रह्मनारदसंवादे त्रिंशोऽध्यायः ॥ ३० ॥ ०संवत् १८४६ पौषे मासि शुक्लपक्षे एकादश्यां चंद्रवासरे ॥

The work has been published, with a commentary,* at Poona, in 1878.

For another work of this title, belonging to the *Padmapurāṇa*, see no. 3394.

[H. T. COLEBROOKE.]

3599.

1711. Foll. 145; size 9¼ in. by 4¼ in.; clear, modern Devanāgarī writing; 9 or 10 lines in a page.

Ānandakānana-māhātmya (or *-rahasya*)—also called *Kāśīmāhātmya* (though not in this MS.)—in 29 chapters, professing to be a section of the *Lakshmīsaṃhitā* of the *Vāyupurāṇa*.

It contains legends connected with the sacred spots of Benares (Kāśī) and its neighbourhood, such as Ānandakānana, etc., and injunctions regarding ablutions to be made there in the different months of the year. Rather incorrect.

It begins: शौनक उवाच ॥

सूतसूत महाप्राज्ञ दैवज्ञ वदतां वर ।
रहस्यं श्रोतुमिच्छामि श्रीमदानंदकाननं ॥ १ ॥
केचिद्वदंति कल्याणं विष्णोरायतनं महत् ।
अपरे शैवमित्येतच्छिंद्धि नः संशयं सतां ॥ २ ॥

सूत उवाच ॥

शृणुध्वं(*r.* शृणुष्व) ऋषिवर्याय रहस्यं पापनाशनं ।
गुह्याद्गुह्यतमं विष्णोः क्षेत्रं विष्णुजनप्रियं ॥ ३ ॥
अयमेव पुरा प्रश्नः कृतः पाराशरायतः ।
पैलादिभिर्मुनिगणैः ऋभूक्षमैश्च (? ०क्षमैश्च) योगिभिः ।
ब्रह्मेशाद्यैः सुरगणैर्मेरुपर्वतवासिभिः ॥ ४ ॥

---

* श्रीमता गोंधळेकरेत्युपाह्वयशालिना श्रीधरात्मजनुषा रावजीत्यपरनाम्ना त्र्यंबकशर्मणा विद्वत्साहाय्येन विरचितया० सरलया टीकया समलंकृतं । *i.e.* composed by *Tryambaka Datta* (son of *Bālācārya*), and published by *Rāvji S'rīdhar Gondhalekar*.

भगवन् श्रोतुमिच्छामि गुह्यमेतन्महोदयं ।
त्वत्प्रसादादिदं ज्ञात्वा प्राप्नुमः परमां गतिं ॥ ५ ॥
काशी किं वैष्णवं क्षेत्रं शैवमेवेति निश्चितं ।
संशयो महतां देव जायते बुद्धिमोहतः ॥ ६ ॥
त्वमेव परमः साक्षात् त्वमग्रे जगदुद्भवः ।
त्वं सर्वद्वज्ञत[:] श्रीमान् वद मे परमार्थदः(०तः) ॥ ७ ॥
त्वं सर्वसाक्षी सर्वेशस्त्वं(*r.*०श त्वं) सर्वमुनिसेवितः ।
त्वमेव परमाधारस्त्वं गतिस्त्वं श्रियः पतिः ॥ ८ ॥
त्वमेव जठरीकृत्य स्वतोपे(?सवतोऽपि) श्रिया श्रियः ।
त्वदुद्भवो जगद्धाता जगत्पासि [तु] विश्वभुक् ॥ ९ ॥
त्वदुद्भवोद्भवः शंभुः शक्राद्यास्तव किंकराः ।
वासुदेवादिभिर्देवैर्मत्स्यादिभिरशेषतः ॥ १० ॥
नानारूपधरालोकं(०रांल्लोकान्) पातु विश्वेश्वरेश्वरः ।
तदेतान्न विजानंति ब्रह्मरुद्रपुरोत्तमाः ॥ ११ ॥
पुरा सर्वत्र देवेषु शंभुशक्रादिकेष्वपि ।
कलिराविष्टवान्भूयस्तस्त्वां शरणं गताः ॥ १२ ॥
वयं त्वां पुरुषसूक्तेन पुरुषं स्तुत्वा(!) जगत्पते ।
विज्ञापितं महाविष्णो भवत्पादनिषेविभिः ॥ १३ ॥ ०

The praise of the *Vaishṇava* creed finds strong expression in passages like this on fol. 93*a*:

न वैष्णवसमं शास्त्रं न वैष्णवसमं व्रतं
न वैष्णवसमं ज्ञानं न भूतं न भविष्यति ॥
इदं रहस्यं परमं वैष्णवानां सुसंमतं
नाख्येयमन्यभक्तानां मिथ्याज्ञानात्मनां नृणां ॥

It ends:

इति श्रुत्वा सुराः सर्वे ऋषिभिः सुसमाहिताः ।
वेदव्यासं सुराध्यक्षं नत्वा पुनः पुनः(!) ॥ १५२ ॥
विस्मयं परमापन्नास्तच्चक्षाः संशयच्छिदः ।
आमंत्र्य निर्गताः सर्वे स्मरंतस्तत्पदांबुजं ॥ १५३ ॥
ऋषयोऽपि महाभागा मुमुदुः पुरसंमताः (? परसंमताः)
सूत उवाच ॥ [॥ १५४ ॥
कथितं वो द्विजश्रेष्ठा वेदव्यासमलात्मना ।
देवेभ्यो मुनिमुख्येभ्यश्चोक्तं प्रश्नानुसारतः ॥ १५५ ॥

इति श्रीवायुपुराणे लक्ष्मीसंहितायां आनंदकाननमाहात्म्ये एकोनविंशोऽध्यायः ॥ ० ॥ संवत् दुर्मतिसंवत्सर आश्विन सुदिप्रतिपद् स्थिरवार समाप्तः ॥

[H. T. Colebrooke.]

3600.

2685. Foll. 8; size $9\frac{3}{4}$ in. by $5\frac{1}{4}$ in.; clear, modern Devanāgarī writing; nine lines in a page.

Gostanīmāhātmya, in 5 *adhyāyas*, containing a legendary account of the origin of a group of sacred pools (and *liṅgas*) near Śrīraṅga, comprised under the name of *Gostanī*; and professing to form part of the *Vāyupurāṇa*.

It begins: श्रीवेदव्यासाय नमः ॥

शुभ्रयज्ञोपवीतं च जटामेखलधारिणं ।
ध्यायेद्वसिष्ठनप्तारं सर्वदेवनमस्कृतं ॥
स्तुत्वा तातं ऋषींश्चैव सर्वधर्मविदां वरः ।
. . . (one line or more omitted) . .
यदिष्टं प्रश्नमुख्यं च पृच्छध्वं मुनिसत्तमाः ।
इत्युक्तास्तेऽपि सूतेन पप्रच्छुर्विनयान्विताः ॥

ऋषयः ॥
सूतसूत महाभाग साधूनां कथनाशन ।
गोस्तन्याः दिव्यमाहात्म्यं रंगनाथस्य वैभवं ॥
वद विस्तरतः स्वामिन्सर्वधर्मविदां वर ।
इत्युक्तस्तानृषीन्सर्वान् संमान्य पुनरब्रवीत् ॥

सूतः ॥
गोस्तन्या दिव्यं माहात्म्यं विषये(!) पृष्टवान्मुनिः ।
नारदो देवशार्दूलं ब्रह्माणं विनयान्वितः ॥

नारदः ॥
स्वामिन्कथय मे देव शिष्योऽस्मि तनयोऽस्मि ते ।
गोस्तन्या दिव्यं माहात्म्यं संसारमलमोचकं ॥
इत्युक्त्वाब्रवीद्ब्रह्मा सर्वदेवशिखामणिः ।

ब्रह्मोवाच ॥
त्वत्समो नास्ति जगति वैष्णवो ब्रह्मवित्तमः ॥
वैष्णवेन त्वया वत्स तारितोऽस्मि न संशयः ।
येषां पुत्रा विष्णुभक्तास्ते धन्या नात्र संशयः ॥
इति पुत्रं तु संमान्य विष्णुं नत्वा जगद्गुरुं ।
गोस्तनीदिव्यमाहात्म्यमब्रवीत्स सुतं द्विजाः ॥

पुरागस्त्यस्य भार्यैभूल्लोपामुद्रा महामते ।
सा तस्य च जटासंस्था भुवि क्षिप्ता प्रकोपिता ॥
सागरं प्रययौ सापि कुबेरतनयाभवत् ।
तां वरुणसदनं यांतीं ज्ञात्वागस्त्यः शशाप ह ॥

त्वं दूषिता जनैः सर्वैर्भैव मूढे दुरासदे ।
इति शप्ता दूषिताभूदगस्त्येन महात्मना ॥
सा श्रीरंगे संस्थितं च हरिं तुष्टाव भामिनी ।
अगस्त्यशापशांत्यर्थं स्वपापोपशमाय वै ॥
तया स्तुतो हरिः प्राह व्याघ्रैः पुंजीकृतानघे ।
तेन व्याघ्रपुरी नाम भुवि ख्यातास्ति भामिनि ॥
मृगव्यालेन तत्राहं गच्छे नात्र विचारणं ।
मत्सेवार्थं तत्समीपे गुहायां लिंगपंचके ॥
सवत्क्षीरस्वरूपेण स्तनपंचकरंध्रकैः ।
तस्मान्निर्गत्य च नदी जलरूपेण भामिनी(०नि) ॥
आगत्य मत्समीपं च तत्र भूत्वा द्विधा सती ।
ततो प्रसिद्धनद्यां च लीना वरुणमंदिरे ॥
तेन पापेन मुक्तासि नात्र कार्या विचारणा ।
इत्युक्ता सा तथा चक्रे हरिणा मुरवैरिणा ॥ ०

The four principal *Tīrthas* subsequently described are Raṅgatīrtha, Brahmatīrtha, Tulasītīrtha and Vāyutīrtha; the latter again consisting of five smaller ones denominated after *Indra, Agni, Yama, Varuṇa* and *Kubera*.

It ends:

इत्येतत्कथितं सर्वं वायुतीर्थस्य वैभवं ।
रंगनाथस्य माहात्म्यं गोस्तन्याश्च तथैव च ॥
इति श्रुत्वा नारदस्तु ब्रह्माणं प्रणिपद्य(०पत्य) च ।
ययौ भूमिं च शीघ्रेण तत्तीर्थं संप्रपद्य सः ॥
तत्र स्नानादिकं कृत्वा परं सौख्यमुपेयिवान् ।
इत्येतत्कथितं सर्वं ऋषयः संशितव्रताः ॥
इति श्रुत्वा शौनकाद्याः सूतं पौराणिकोत्तमं ।
पूजां चक्रुर्विधानेन गोभूतिलधनादिभिः ॥

[MACKENZIE COLLECTION.]

3601.

2678b. Foll. 17 (paged 1–34); size 4to, 8½ in. by 7½ in.; written on rough country paper, in the Telugu character; 22–32 lines in a page.

Pāpaghnī-māhātmya, a legendary account of the sacred river Pāpaghnī; professing to form part of the *Vāyupurāṇa*.

It begins:

अथ वक्ष्ये महामंत्रं पापघ्न्या वैभवं परं ।
यं श्रुत्वा मुच्यते जंतुः जन्मसंसारसागरात् ॥
श्रीशैलनिर्झृतेभागे(? श्रीशैलान्नि०) चतुर्विंशतियोजने ।
संधिपादे समुद्भूताः पंच नद्यो भुवि श्रुताः ॥
पिनाकिनी सरिच्छ्रेष्ठा पापघ्नी चित्रिका शुभा ।
अर्कावती क्षीरनदी पंच नद्यो भुवि श्रुताः ॥
पिनाकिन्यर्कक्षीराद्याः(!) दक्षिणोदधिगा भवेत् ।
पिनाकिनी चित्रिका च पापघ्नी चोदधिं गते ॥

ऋषयः ॥

पिनाकिनी दक्षिणतो गताब्धिं सरितां वरा ।
पूर्वेण सागरेणैव पापघ्नीचित्रिके शुभे ॥
संगता(!) इति न पूर्वं श्रुतं तन्नो वद प्रभो ।
वेदव्यासप्रसादेन सर्वं वेत्स्यद्य(? ष्य)शेषतः ॥

श्रीसूतः ॥

साधु एष भवद्भिर्यन्नालवं मुनिपुंगवं ।
कुटीरस्था मुनिवराः पप्रच्छुरिदमादृताः ॥

कुटीरस्थाः ॥

गालव त्वं महाभागो वेत्सि सर्वा महानदीः ।
दक्षिणोदधिगां प्राहुः केचित्पूर्वोदधिं गतां ॥ ०

It ends: गालवः ॥

ज्ञानसंपत्प्रदायिन्याः पत्न्याः(*r.* पत्न्या) माहात्म्यमुत्तमं ।
विशेषेणैव कथितं अपवर्ग्यं शुभप्रदं ॥
य एतत्पुण्यमाख्यानं शृणुयाच्छ्रद्धयान्वितः ।
परमं मोक्षमाप्नोति योगिनामपि दुर्लभं ॥

इति श्रीवायुपुराणे पापघ्नीमाहात्म्ये(०त्म्ये) नवमोऽध्यायः ॥

[MACKENZIE COLLECTION.]

3602.

2708. Foll. 14; size 8¼ in. by 4¼ in.; indifferent Devanāgarī handwriting; 8–11 lines in a page; European paper (watermark 1818).

Rājagṛiha-māhātmya, a legendary account of Rājagṛiha, the ancient capital of Magadha, or Behar (Wilson, Mack. Coll., p. 140), in two (or three) chapters; ascribed to the *Vāyupurāṇa*. [A.]

It begins:

नारायणं नमस्कृत्य ० ॥
शौनकस्य कुलपतेः सत्रे द्वादशवार्षिके ।
सुखोपविष्टा मुनयः पप्रच्छुः शौनकादयः ॥
सौतिं(सूतं B) धर्मभृतां श्रेष्ठं वेदवेदांगपारगम् ।
तत्रैव नैमिषारण्ये महापापप्रणाशने ॥

शौनक उवाच ॥
माहात्म्यं पुष्करादीनां तीर्थानां प्रोक्तवानसि ।
किंकटेषु (*r.* कीकटेषु) महापुण्यं जलं पातालजाह्नवीं[1] ॥
कवोष्णं वर्णितं प्राज्ञ पुण्यं राजगृहं वनं[2] ।
माहात्म्यं श्रोतुमिच्छामि तस्य तीर्थस्य कृत्स्नशः
सौते तव प्रसादेन कृतार्थो ऽस्मि न संशयः[3] ॥

सौतिरुवाच (सूत उ० B) ॥
साधु साधु त्वया पृष्टं माहात्म्यमघनाशनं ।
एतदेव पुरा ब्रह्मन्पप्रच्छ यदुमा भवम्[4] ॥
कैलासशिखरासीनं देवदेवं महेश्वरं(जगत्पतिं B) ॥

पार्वत्युवाच ॥
मगधेषु तपोदश्च गंगोद्भेदश्च विश्रुतः ।
श्रोतुमिच्छामि माहात्म्यं तस्य तीर्थस्य भो प्रभो ॥ ०

It ends:

श्रुत्वैतत्पुण्यमाहात्म्यं वाचकं यत्नतो(च ततो B) ऽर्चयेत् ।
गां भूमिं च सुवर्णानि वस्त्रमन्नानि रौप्यकं[5] ॥
दद्यात्सर्वेषु नाशाय विष्णोः संतोषणाय च ।
वाचके तोषिते देवी संतुष्टा पितृदेवता ॥

इति श्रीवायुपुराणे राजगृहमाहात्म्ये उमामहेश्वरसंवादे द्वितीयो ऽध्यायः ॥

[MACKENZIE COLLECTION.]

3603.

2876b. Foll. 6; size 12½ in. by 6¼ in.; modern Telugu handwriting; 15–18 lines in a page.

[1] कीटकेषु ०पातालजाह्नवं B.
[2] प्राज्ञैः पुण्यं राजगृहे वने । B.
[3] B omits this line.
[4] एतदेव पुरा पृष्टं पर्यपृच्छदुमा भवं । B.
[5] सुवर्णं च वस्त्रमन्नं सरौप्यकं । B.

Rājagṛiha-māhātmya. [B.] A more correct copy.

On fol. 1*a*, and in the margin of the first two pages (but not in the colophons), it is called *Rājagirimāhātmyam.*

The same matter is here divided into three chapters; followed by a fourth (22 *ślokas*), called *Tapovana-māhātmya*, which begins:

शौनक उवाच ॥
सूत सर्वार्थतत्त्वज्ञ कथयस्व ममाग्रतः ।
तपोवनस्य माहात्म्यं कथं केन विनिर्मितं ॥ १ ॥

सूत उवाच ।
शृणुष्व मुनिशार्दूल माहात्म्यं पापनाशनं ।
पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ॥ २ ॥
उवाच चतुरः पुत्रान् मानसान् ब्रह्मवित्तमान् ।
चंडकौशिकनामानमपरं कौशिकं तथा ॥
सनंदनं तृतीयं च चतुर्थं च सनातनं ।
सुताः शृणुत मे वाक्यं स्वहितं धर्मसाधनं ॥
मदाज्ञया भुवं गत्वा प्रजामुत्पाद्य धर्मतः ।
ततः स्वर्गं सुखं भुक्त्वा कुरुध्वं तप उत्तमं ॥ ०

It ends:

आमान्नैर्भोजनैश्चापि दक्षिणाभिर्विशेषतः ।
तेषां मनोरथान् सर्वान् प्रददाति हरिः स्वयं ॥

इति श्रीवायुपुराणे तपोवनमाहात्म्ये चतुर्थोध्यायः ॥

[MACKENZIE COLLECTION.]

3604.

2168. Foll. 237; size 12¾ in. by 4¾ in.; good Devanāgarī writing of 1814 A.D.; eight lines in a page.

Vishṇudharmāḥ—or *Vishṇudharmottara*, as it is commonly called (though not in this MS.)—a treatise on the divinity and worship of *Vishṇu*; classed by most authorities as an independent *Upapurāṇa*, whilst some make it the second part of the *Gāruḍapurāṇa*.

It begins: नारायणं नमस्कृत्य ० ॥
द्वैपायनोष्ठपुटनिःसृतमप्रमेयं ०

See Rāj. Mitra, Notices, vii., p. 65; Weber, Berl. Cat., no. 1758.

It ends:

अत्रोक्तविधियुक्तस्य पुरुषस्य विपश्चितः ।
न दुर्लभं नरव्याघ्र परमं ब्रह्म शाश्वतं ॥

इति विष्णुधर्मेषु शास्त्रमाहात्म्यं परामृतं धर्मोत्तमं परिसमाप्तमिति ॥

Then follows an *anukramaṇikā* of the chapters (विष्णुधर्मेष्वमी वृत्तान्ताः । °), amounting to 102 or 103, for which see Weber's description; after which it concludes (like the two MSS. referred to) with the verse:

न हि तत्सर्वतीर्थेषु सरित्सु च विमज्जनात् ।
फलं भवत्यनंतस्य यादृक् पादांबुधारणात् ॥

For another work of the same title, consisting of three *Kāṇḍas*, found in Kaśmīr, and, like the present work, used by *Albērūnī*, see Bühler's Essay, Indian Antiquary, vol. xix., p. 382 seqq. [Dr. F. Buchanan.]

3605.

1971. Foll. 14; size 8 in. by 4 in.; indifferent, modern Devanāgarī writing; ten lines in a page.

Apāmārjanastotra, ascribed to the (*Pulastya-dālbhyasaṃvāda* of the) *Vishṇudharmottara* (*Vishṇurahasya*).

It begins: दाल्भ्य उवाच ॥

भगवन् प्राणिनः सर्वे विषरोगाद्युपद्रवैः ।
दुष्टग्रहोपघातैश्च सार्वकालमुपद्रवाः (सर्व° द्रुताः W.) ॥ १ ॥
आभिचारिककृत्याभिः स्पर्शरागैश्च (अभिचार° रोगैश्च [W.]) दारुणैः ।
सदा संपीड्यमानाश्च (°स्ते W.) तिष्ठंति मुनिसत्तम ॥ २ ॥
येन कर्मविपाकेन ग्रहरोगाद्युपद्रवाः (विषरो° W.) ।
न भवंति (*r.* संभवंति) नृणां तन्मे यथावद्वक्तुमर्हसि ॥ ३ ॥

पुलस्त्य उवाच ॥

व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनि तोषितः ।
ते नरा मुनिशार्दूल ग्रहरोगादिभागिनः ॥ ४ ॥
यैर्न तत्प्रवणं चित्तं सर्वदेवपरैः कृतं ।
विषग्रहज्वराणां ते मनुष्या दाल्भ्य भागिनः ॥ ५ ॥ ° १२ ॥

दाल्भ्य उवाच ॥

अनाराधितगोविंद (°दा) ये नरा दुःखभागिनः ।
तेषां दुःखाभिभूतानां यत्कर्तव्यं दयालुभिः ॥ १३ ॥
पश्यद्भिः सर्वभूतस्थं वासुदेवं महामुने ।
समदृष्टिभिरीशानं तन्मुने ब्रूह्यशेषतः ॥ १४ ॥

पुलस्त्य उवाच ॥

श्रोतुकामोऽसि वै दाल्भ्य शृणुष्व सुसमाहितः ।
अपामार्जनकं वक्ष्ये न्यासपूर्वमिदं परं ॥ १५ ॥
सौवर्णं राजतं ताम्रं मृन्मयं वा नवं दृढं ।
अव्रणं कलशं शुद्धं स्थापयेत्तंडुलोपरि ॥ १६ ॥
तत्रोदकं समानीय शुद्धं निर्मलमेव च ।
एकं शतं कुशान्साग्रान् स्थापयेत्कलशोपरि ॥ १७ ॥
वाराहं नारसिंहं च वामनं च प्रयत्नतः ।
पूजयेत्कलशे तत्र शुभोपचारैः समंत्रकैः ॥ १८ ॥ ° ४७ ॥
पादमूले तु देवस्य शंखं विन्यस्य निर्मलं ।
वनमालां हृदि न्यस्य सर्वदेवाभिपूजितां ॥ ४८ ॥
गदां वक्षःस्थले न्यस्य चक्रं विन्यस्य पृष्ठतः ।
श्रीवत्सांकं न्यसेन्मूर्ध्नि पंचांगं कवचं न्यसेत् ॥ ४९ ॥

ओं नमो विष्णवे केशवाय सर्वक्लेशापहर्त्रे हृदयाय नमः । एवं षडंगं कृत्वा भूर्भुवः स्वरोमिति दिग्बंधः ।

विष्णुस्तु ऊर्ध्वतः पातु वैकुंठस्तु दिवि दिशि ।
पातु मां सर्वतो रामो धन्वी चक्री च केशवः ॥ ५० ॥ °

It ends:

धन्यो यशश्च (*r.* यशस्यः) शत्रुघ्नस्ततो ऽयं मुनिसत्तम ।
पठतां शृण्वतां चैव ददाति परमां गतिं ॥ १६४ ॥
एतत्स्तोत्रगतं पुण्यं जपेदायुष्यवर्धनं ।
विनाशाय च रोगाणामपमृत्युभयापहं ॥ १६५ ॥

इति विष्णुधर्मोत्तरे विष्णुरहस्ये पुलस्त्यदाल्भ्यसंवादे अपामार्जनस्तोत्रं संपूर्णं ॥

The same tract is contained in the Berlin MS. (Weber, Cat., no. 1162); whilst that described in Rāj. Mitra's Notices, ii., p. 292, likewise assigned to the *Vishṇudharmottara*, seems to be at least a different version.

[Dr. John Taylor.]

3606.

420. Foll. 379; size 11¾ in. by 5¼ in.; clear Devanāgarī writing of 1770 A.D.; 11–14 lines in a page.

Vishṇupurāṇa, aṃśas I., II., V. & VI. with *Śrīdharasvāmin's Ātmaprakāśa* (or *Svaprakāśa*), and *aṃśas* III. & IV. with *Ratnagarbha's Vaishṇavākūtacandrikā.*

The same combination of the two commentaries appears in the Oxf. MS. (Cat., no. 111), and in the Calcutta edition (1867, etc.), which, whilst professing to give *Śrīdhara's* commentary throughout, tacitly substitutes for it that of *Ratnagarbha* on books III. and IV. But, indeed, *Ratnagarbha's* commentary can hardly claim to being more than a revised edition of *Śrīdhara's* work. The latter has been published in a complete form, together with another commentary, by *Vishṇucitta* [1] (the *Vishṇucittīya*), at Madras (1858; again 1882).

The commentary begins:

श्रीविंदुमाधवं वंदे परमानंदविग्रहं ।
वाचं विश्वेश्वरं गंगां पराशरमुखान्मुनीन् [2] ॥

श्रीमच्चित्सुखयोगिमुख्यरचितव्याख्यां [3] निरीक्ष्य स्फुटं
तन्मार्गेण सुबोधसंग्रहवतीमात्मप्रकाशाभिधां ।
श्रीमद्विष्णुपुराणसारविवृतिं कर्तुं यतिः श्रीधर-
स्वामी सद्गुरुपादपद्ममधुपः साधुः स्वधीशुद्धये (स्वसं-
[सिद्धये) ॥

To the reference in the 2nd verse is owing the erroneous title on fol. 1*a*, 'The *Vishnu Purán* with *Chitsukha Yogí's Tíká.*'

Each *aṃśa* is paged separately: I. 86; II. 54; III. 59; IV. 65; V. 79; VI. 36.

The copyist's signature runs as follows: संवत् १८२७ पल्लव(*r.* प्लव) नाम संवत्सरे वैशाखमासे शुद्धपक्षे प्रतिपदि तद्दिने वैष्णवाश्रमेण जीवनबुद्धा लिखितं ॥ and at the end of book II.: नीलकंठस्य निकटे लिखितं ॥

[H. T. Colebrooke.]

3607.

1380. Foll. 448; size 16¾ in. by 6 in.; good, clear, modern Devanāgarī writing; 9–12 lines in a page.

Vishṇupurāṇa, with the *Vaishṇavākūtacandrikā* of *Ratnagarbha,* son of *Hiraṇyagarbha,* and grandson of *Mādhava.*

The commentary begins:

य आस्ते हृदयग्रंथिगूढचिंतामणिद्युतिः ।
चेतयन्नखिलं विश्वं तस्मै श्रीविष्णवे नमः ॥
हिरण्यगर्भतनयो माधवस्यात्मजात्मजः ।
श्रीरत्नगर्भस्तनुते वैष्णवाकूतचंद्रिकां ॥

Aṃśa I. ends fol. 117*a*; II., fol. 182*a*; III., fol. 239*a*; IV., 302*b*; V., 408*a*; VI., 448*a*.

At the beginning of *aṃśa* II. the commentator remarks:

अन्यटीकास्थमुद्धृत्य व्याख्यासारं मनीषया ।
श्रीरत्नगर्भकृतिना प्रथमोंऽशो निरूपितः ॥

The commentary ends:

यदस्य ग्रंथस्य स्फुटपदपदार्थादिविदुषां
न केषामप्यर्थैः स्फुरति सति संदेहतिमिरे ।
अतो विद्यावाचस्पतिवचनदीपावलिमता
मया व्यक्तानर्थान् हृदि कुरुत संतः सहृदयाः ॥
चंद्राकरस्य तनयो रतिनाथमिश्रः
क्षोणींद्रमंत्रकृदभूदथ तत्सुतेन ।
मूर्धाकरेण नृपमंत्रिवरेण यत्नात्
संप्रार्थितो विहितवानहमस्य टीकां ॥

---

[1] In the colophon he is called *Vishṇucittārya,* the disciple of *Rāmānuja Yatíśvara* (*śrībhagavadrāmānujayatīśvarasarojacañcarīka*). The commentary itself begins: श्रीविष्णुचित्तपदपंकजसंगमाय चेतो मम स्पृहयते किमतः परेण । नो चेन्ममापि यतिशेखरभारतीनां भावः कथं भवितुमर्हति वाग्विधेयः ॥

[2] The Madras ed. reads for this line: तथा पुराणतत्त्वज्ञान् पराशरमुखान्मुनीन् ॥

[3] श्रीविद्वत्सुखयोगि० M. ed.

इति श्रीरत्नगर्भभट्टाचार्यविरचितायां श्रीमद्वैष्णवाकूतचंद्रिकायां विष्णुपुराणटीकायां षष्ठेंऽशे ऽष्टमो ऽध्यायः ६ ॥ समाप्ता चेयं वैष्णवाकूतचंद्रिका ॥ [H. T. COLEBROOKE.]

3608.

1695. Foll. 448; size 9½ in. by 6 in.; clear, modern Devanāgarī writing; number of lines varying.

The same work, apparently copied from the preceding MS., and following it closely in the amount of matter apportioned to each page.

Another MS. would, however, seem to have been collated by the copyist, seeing that he, by his own hand, added emendations on the margin of MS. 420, which were embodied in the text of this copy. [H. T. COLEBROOKE.]

3609.

2897d. Foll. 3; size 9¼ in. by 4 in.; clear, modern Devanāgarī writing; 9 or 10 lines in a page.

An extract from the *Vishṇupurāṇa*, commendatory of devotion to *Vishṇu*; viz., I. 17, v. 53 to the end of the first *aṃśa*.

It begins: पराशर उवाच ॥

एवमभ्यर्थितस्तैस्तु दैत्यराज[:] पुरोहितैः ।
दैत्यैर्निष्क्रामयामास पुत्रं पावकसंचयात् ॥

[DR. JOHN TAYLOR.]

3610.

841. Foll. 78; size 4to, 11 in. by 9 in.; good, modern Devanāgarī writing (European paper); twenty lines in a page.

Vishṇupurāṇa-sūcīpatra, an elaborate analysis of the *Vishṇupurāṇa*, on the same plan as the *Sūcīpatra* to the first printed Calcutta edition of the *Mahābhārata* (Gildemeister, Bibl. Sanskrita, p. 37), following the text *adhyāya* for *adhyāya*, with references to particular verses or numbers of verses.

It is written in the same hand as the similar indexes to other *Purāṇas* contained in MSS. 365 and 366 (see nos. 3738-39).

[H. T. COLEBROOKE.]

3611.

2815. Foll. 147; size 12½ in. by 5½ in.; clear Devanāgarī writing of about 1750 A.D.; twelve lines in a page.

Śivapurāṇa, or rather that section of it commonly passing under that name, in 75 (or 76) *adhyāyas*. [A.]

It begins:

जगतः पितरं शंभुं जगतो मातरं शिवां ।
तत्सुतं च गणाधीशं नत्वैतद्वर्णयाम्यहं ॥

For a full analysis see Aufrecht, Cat. Bodl., no. 113. In this MS. the chapters are not numbered. It ends:

इति तस्य वचः श्रुत्वा ह्यानंदं परमं गताः ।
तं चैव पूजयामासुर्नानावस्त्रैः सुशोभनैः ॥
चंदनैश्च विचित्रैश्च नानालंकरणैस्तथा ।
नमस्कारैः स्तवैश्चैव स्वस्तिवाचनपूर्वकं ॥
आशीर्भिर्विविधाभिश्च वर्धयामासुरंजसा ।
संतुष्टाश्चैव ते सर्वे संतुष्टः सूत एव च ॥
परस्परं च संतुष्टाः शिवभक्तिपरायणाः ।
इतदेव परं मत्वा नमंति च भजंति च ॥
एवं यः शृणुयाच्च सर्वान्कामानवाप्नुयात् ।
अंते भक्तिं परां प्राप्य मुक्तिं वै प्राप्नुयात्पुनः ॥ ० ॥

इति श्रीशिवपुराणे व्याससूतसंवादे ज्ञानप्रकरणनिरूपणो नामाध्यायः ॥

In Rāj. Mitra's description of a MS. containing three of the (twelve) *saṃhitās* of the *Śivapurāṇa* (Not., i., p. 66), the *uttarabhāga* of the *Rudrasaṃhitā* would seem to correspond to the present section of the work.

[SIR CHARLES WILKINS.]

3612.

1876. Foll. 195; size 11¼ in. by 5¼ in.; good Devanāgarī writing of about 1750 A.D.; eleven lines in a page.

The same work. [B.]

It ends:

एतदेव परं मत्वा ०। एवं यः शृणुयान्नित्यं ०॥ ६५॥

अंते भक्तिं परां प्राप्य मुक्तिं वै प्राप्नुयात्पुनः।

लिखित्वा यस्तु दद्याद्वै पुराणं शिवसंज्ञितं (०तं)॥ ६६॥

हेमवृषसमायुक्तं चतुर्वेदैश्च संमतं।

तस्य वासो भवेन्नित्यं शिवलोके न संशयः॥ ६७॥

स तु शिवसमाकारं लभते ऽपापसंयुतः।

तस्मात्सर्वप्रयत्नेन दीयतां शैवकं द्विजाः॥ ६८॥

तत्रापि दक्षिणा देया सुवर्णानां चतुष्टयं।

एवं ददाति यो भक्त्या शिवलोके महीयते॥ ६९॥

तत्रस्थो न च्यवेत्क्वापि शिवसायुज्यमाप्नुयात्।

सत्यं सत्यं पुनः सत्यं नान्यथा मम भाषितं॥ ७०॥

इत्युक्त्वा विररामासौ सूतः पौराणिकोत्तमः॥

इति श्रीशिवपुराणे व्यास० पंचसप्ततितमो ऽध्यायः॥ ७५॥

[Dr. John Taylor.]

3613.

43. Foll. 239; size 8vo, 6 in. by 9½ in.; fair Devanāgarī writing of 1797 A.D.; eighteen lines in a page.

The same work. [C.]

Concluding verses and colophon as in MS. A.

[H. T. Colebrooke.]

3614.

835. Foll. 115; size 12¾ in. by 6 in.; legibly written in Devanāgarī, in 1804 A.D.; thirteen or fourteen lines in a page.

The same work. [D.]

It ends as MS. A. This MS. counts 84 *adhyāyas*, but as the marking of the chapters is rather irregular, the number is not easily checked. [H. T. Colebrooke.]

3615.

2659a. Foll. 179; size 10¼ in. by 6 in.; fair modern Devanāgarī writing; fourteen lines in a page.

The same section of the *Śivapurāṇa*. [E.]

Colophon: इति श्रीशिवपुराणे सनत्कसूतसंवादे ज्ञानप्रकरणनिरूपणो नामाध्यायः॥ ७६॥ प्रथमं खंडं संपूर्णं॥

This latter designation was probably added by the copyist with reference to the next section (written in an older hand) bound up with it in the same volume, though the latter is not called 'second *khaṇḍa*.'

The difference in the number of *adhyāyas* between this MS. and C is owing to *adhy.* 17 of B being divided into two *adhyāyas* in this MS. As the numbering of the verses in this MS. is often continued over several chapters, such a subdivision could easily occur.

[Gaikawar.]

3616.

2659b. Foll. 233 (counted 234, no. 28 having been omitted); size 10¼ in. by 6¼ in.; fair Devanāgarī writing of 1699 A.D.

Another section (? the *Dharmasaṃhitā*) of the *Śivapurāṇa*.

It begins: सनत्कुमार उवाच॥

एतच्छ्रुत्वा वचस्तस्य सो ऽब्रवीन्नं महामुनिं।

विस्मयं परमं गत्वा ऋषिं प्रयतमानसः॥

व्यासदेव उवाच॥

धन्यस्त्वमसि विप्रेंद्र कस्त्वत्तो ऽस्तीह पुण्यकृत्।

यस्य देवातिदेवस्ते सांनिध्यं कुरुते च मे॥

दर्शनं मुनिशार्दूल दद्यात्स भगवान् शिवः।

अपि तावन्ममाप्येवं प्रसादं चेत्करोत्यसौ॥

उपमन्यु[रु]वाच॥

अचिरेणैव कालेन महादेवं न संशयं(r. ०यः)।

सर्वदेवगणाध्यक्षं द्रक्ष्यसे पुरुषोत्तम॥

षोडशाष्टौ वरांश्चैव प्राप्स्यसि त्व महेश्वरात् ।
सपत्नीकात्क्षयं नादात् त्वं हि देवो जनार्दनः ॥
पूज्यो ऽसि दैवतैः सर्वैः श्राघनीयः सदा रणे ।
जप्यं च ते प्रदास्यामि श्रद्दधानाय चाच्युत ॥
ब्रह्मण्यः श्रद्दधानश्च सत्यं द्रक्ष्यसि शंकरं ।
श्रात्मतुल्यबलं पुत्रं भविष्यसि(r. लभि°) महेश्वरात् ।
देव ज्ञातो ऽसि दृष्टो ऽसि पुत्रकामो भवान्मया ॥
व्यास उवाच ॥
एवं कथयतस्तस्य महादेवाश्रिताः कथाः ।
दिनान्यष्टौ प्रयातानि मुहूर्तमिव तापसाः ॥
नवमे तु दिने प्राप्ते मुनिना स च दीक्षितः ।
मंत्रमध्यापितः शार्वमथर्वशिरसं महत् ॥
जटी मुंडी तु संचारी बभूव नियमान्वितः ।
मुनिना दीक्षितः कृष्णः कुतपो मौंजमेखली ॥
मासमेकं जलाहारो(? निराहारो) द्वितीयं जलनाक्षभुक् ।
मासत्रयं वायुभक्षो बभूव सुसमाहितः ॥
पादांगुष्ठाङ्गततनुः षष्ठे चोर्ध्वभुजस्तथा ।
संप्राप्ते सप्तमे मासि संतुष्टो दर्शनं ददौ ॥
